In Public domain. Digitization Muthulakshmi Research Academy

147

(84)

In Public domain. Digitization Muthulakshmi Research Academy

॥ पुराण पठन प्रारंभ श्लोकाः ॥

शुक्लांबरधरं - - - - - - - - - शांतये ॥

श्रीमन् शशांक शकलांकित मौलि भाग

क्षोणी धरागत्य तनया स्थित वाम भाग ।

- - - - - गण वल्लभ चारु भोग

श्रीशुद्धरत्न वर लिंग मम प्रसीद ॥ १

त्वय्येव मे दृढतरा हृदि भक्तिरस्तु

त्वत्पाद पंकज युगे नतये स्तु मूर्धा ।

त्वं ना - - - नेस्तु गिरीश वाङ्मे

त्वत्पूजनाय विनतं सकलांग मस्तु ॥ २

वरं वरेण्यं वरदं पुराणं निज प्रभा द्योतित सर्वलोकम् ।

त्वामादि देवं - - - प्रणौमि मूर्ध्ना भ्रवणे विभांतम् ॥ ३

नमो नमस्ते जगदेक कर्त्रे नमो नमस्ते जगदेक भर्त्रे ।

नमो नमस्ते जगदेक हर्त्रे नमो नमस्ते त्रिपुर प्रहर्त्रे ॥ ४

श्रीमन्नाम्र वणेश्वर त्रिपुरहन् श्रीकंठ गंगाधर

क्षोणीभृत्तनया निविष्ट विलस द्वामांग देवोत्तम ।

भक्तिस्त्वत् - जे भवतुमे मायापहंत्री सदा

सर्वं सैव विधास्यते श्रित मनो भीष्टं यथा कल्पकः ॥ ५

In Public domain. Digitization Muthulakshmi Research Academy

तं कालकाल मखिलेश्वर मिंदुचूडं
आर्तार्ति भंजन - - - - - - - क्ष दीक्षम ।
एकेषुणैव विनिहत्य पुरत्रयं च
संरक्षित त्रिभुवनं शरणं व्रजामि ॥ 6
तं कालकूट गरल प्रदहं त्रिलोकीं
जावत्सु - - - - - - - - - न्विति दैवतेषु ।
पीत्वा जुगोप सहसा जगतीः सखेलं
वेला मतीत करुणं शरणं व्रजामि ॥ 7
क्रूरं महाव्य जटिलं हृत सर्व लो -
- - - कदंब मवधीद् निमेष शान्तम् ।
यो वा जलंधर म - - - - ज पादरेखा
चक्रेण विश्वभिषजं शरणं व्रजामि ॥ 8
उद्दालकस्य तनयं तिनं वसिष्ठं
यश्वेत - - - वनौ यमपाश जुष्टम् ।
गोपायति स्म हि तथैव शिलादपुत्रं
तते कृतांत वदना च्छरणं व्रजामि ॥ 9
यत्सा ध्वसा दुदय मस्तमयं च कुर्वन्
बंभम्यते भा - - - - - - सदैव पूषा ।

In Public domain. Digitization Muthulakshmi Research Academy

चंचूर्यते पवन रग्ष धनंजयोपि
देदीप्यते तिगुमहं शरणं व्रजामि ॥ १०

यद्देव देव मिह लिंग तनौ समर्च्य
ब्रह्मादय - - - - - नो रव्य माप्नुवंति ।
तद्ब्रह्म फाल महसा प्रविलीढ कामं
शर्वं सनातन महं शरणं व्रजामि ॥ ११

जय जय सनकाद्यै र्योगिभि
जय जय निटिलाक्ष ज्योतिषा लीढकाम ।
जय जय निगमांतै र्वेद्य भक्तार्तिहारिन्
जय जय शिव शंभो पाहि मा(मा)क्र नाथ ॥ १२
जय जय - - - चारुचन्द्रार्धमौले
~~जय जय - - - - - चारु चन्द्रार्ध मौले~~
जय जय नतवंश्यो धूर्जटे दिव्यमूर्ते ।
जय जय विधि पूर्वै र्दैवतै र्वन्दितांघ्रे
जय जय शिव शंभो पाहि मा(मा)क्र नाथ ॥ १३
जय जय गिरिकन्या श्लिष्ट वामांक शालिन्
जय जय फणि वर्यै र्भूषणै र्भूषितांग ।
जय जय सुरसिंधु स्फीत चूडाव भासिन्
जय जय विपिने - - - - - - - ग ॥ १४

In Public domain. Digitization Muthulakshmi Research Academy

यस्माथो निमंथने समभव ज्वालाहला गरं
तत्पीत्वा जगतीं जुगोप सहसा सोयं पुरां मर्दनः
ऐणेयीं तनु मार्यया सहग - - - - - - कान्
श्रीमानाम्रवणेश्वरो विजयते कारुण्य वारांनिधिः॥

2 A कदाचिन्नैमिशारण्ये मुनयः संशित व्रताः
अभिषिक्त स्त्रसी पृष्वाः कृतजप्या हुताग्नयः॥ 1
शौनकाद्या महात्मानः श्रोतृ कामाः कथाः शुभाः
अभिगम्य महात्मानं सूतं पौराणिकोत्तमम् ॥ 1
कृतांजलि पुटाः सर्वे व्यास शिष्यं समब्रुवन्।
कृतार्था हि वयं सर्वे लोके धन्य तमा अपि ॥ 18
अश्रौष्म त्वन्मुखां भोजात् शोभनाः शांभवीः कथाः
गंगादि तीर्थ माहात्म्यं क्षेत्राणा मपि वैभवम्॥ 1
तथापि वर्तते स्माकं शुश्रूषा महती ।
भवान् हि शंकरः साक्षा दवतीर्णोत्र भूतले॥ 2
तस्मादविदितं नेह भवतः किंचिदस्ति हि।
दक्षिणे दण्डकारण्ये कावेर्याश्चोत्तरे तटे ॥ 2
गायत्री सरित स्तीरे महदाम्रवणं शुभम्।
आस्ति तत्र स्वयं व्यक्तं महालिंगं सनातनम्॥ 2

In Public domain. Digitization Muthulakshmi Research Academy

दृष्ट मात्रेण पापघ्नं सर्वेषां प्राणिनामिति।
उक्तं हि संग्रहेणैव पुरा नः सूतनंदन ॥ 23
तस्य क्षेत्रस्य माहात्म्यं कथयस्व सविस्तरम्।
अष्टादश पुराणानि भासा त्सत्यवती सुतात् ॥ 24
पिता तेऽधि जगे पूर्वं तन्मुखा द्भवतापिच।
तान्यधीतानि सर्वाणि सादरं सूतनन्दन ॥ 25
तस्मात्त्व द्वदनां भोजात् पौराणिक हितां शुभाम्।
आकर्णयितुमिच्छामो भवान् शंसितु मर्हति ॥ 26
इति तेषां वचः श्रुत्वा सूतः सर्व पुराण वित्।
ध्यात्वा भवणनाथं च संप्र ---- तनूरुहः ॥ 27
उवाच विजयोपेतो ----- शीयान् तपोधनान्।
काहं मंद मतिर्विप्राः क्व च तत् स्थल वैभवम् ॥ 28
2 B सहस्र वदनैर्वक्तुं --- णापि न पार्यते।
तथापि किंचित्तत्क्षेत्र माहात्म्यं वच्मि सांप्रतम् ॥ 29
इत्युक्त्वा तान् पुनः प्राह सूतः सर्वान् मुनीश्वरान्।
मृगंडुर्नाम विप्रेंद्रा - ... शिव भक्तिमान् ॥ 30
एतदा भवण क्षेत्रं पुरा संप्राप्य शोभनम्।
तपसा महदाराध्य तन्महालिंग मुत्तमम् ॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

मार्कंडेयं सुतं लब्ध्वा ययौ मुक्तिं च दुर्लभाम्।
ब्रह्माप्यनृत माभाष्य पुरा रुद्रस्य सन्निधौ॥
तत्क्रोध संभवां सद्यो लोक सृष्टा वशात्मताम्।
आत्मन्योप निनीषुः सन् प्राप्यामृवण मुत्तमम्॥
तपः कृत्वा महत्तीव्रं नियमेन समन्वितः।
यथावल्लोक कर्तृत्व मगात्तल्लिंग पूजनात्॥
पुरा संक्रन्दनस्यापि कंदर्प वशमेयुषः।
अहल्या संगमात् प्राप्तास्सहस्रं योनयो कृतम्॥
तपसामृवण क्षेत्रे लोचनानि चकाशिरे।
कहोलक सुतश्चापि मातृगामि दोषतः॥
मुक्त आमृवणेशस्य दर्शनात्तत्सुरपि।
स्वदोषाच्च विनिर्मुक्ता तस्य क्षेत्रस्य वैभवात्॥
वेदमित्राख्य विप्रेण तुं वाराणसीं पितुः॥
आहूतं त्वस्थि संप्राप्य क्षेत्रे मामृवणाभिजम्॥
तत्क्षेत्र वैभवादेव शङ्करत्वं व्यजायत।
सूर्या चंद्र मसौ देवौ समर्च्यामृवणेश्वरम्॥
अहस्त्रियामान्या प्रापतुस्तदनुग्रहात्।
संज्ञा भार्या रवेः पूर्वं अश्विनौ भिषजां वरौ॥

In Public domain. Digitization Muthulakshmi Research Academy

3A प्रसूय वडवा भूत्वा वाजिरूपेण भास्वता।
संगम्य विपिने तस्मिन् सेहे सा तिग्म तेजसम्॥
वार्द्ध्य इव तपसो विघ्नं विधाय सरितां पतिः।
तच्छापाद्दशुचिर्भूत्वा क्षेत्र मामृवणं पुनः॥
प्राप्योग्र तपसा तत्र पर्व कालेषु शुद्धताम्।
समवाप विना सेतुं सेतौ शुद्धो भवत्सदा॥
कदाचित्क्षेत्र वर्येऽस्मिन् पार्वती परमेश्वरौ।
रुग्ण रूपं समाश्रित्य तच्छिशून् संररक्षतुः॥
अन्यच्च महदाश्चर्यं गायत्री सरित स्तटे।
पुरा समभवत्तस्मात् क्षेत्रस्य सरित स्तन्वा॥
चरितं भवतां किंचित् वर्ण्यते कथं चन।
शृण्वतां सर्वपापघ्नं सर्व संपत्करं नृणाम्॥
दक्षिणे दंडकारण्ये कावेरी सह्यसंभवा।
वर्तते सरिता श्रेष्ठा गंधर्वामर सेविता॥
मत्स्य कच्छप संपूर्णा तापसाश्रम शोभिता।
दृष्ट मात्रेण पापघ्नी सर्वेषां प्राणिनामिह॥
तदुत्तरे सरित्पुण्या गामती नाम शोभना।
ब्रह्मणा हि समानीता स्वस्य यज्ञ समृद्धये॥

In Public domain. Digitization Muthulakshmi Research Academy

निष्कलमषे शुभे तीर्थे तस्यास्सज्जनचित्तवत्।
वर्षय स्तत्रगाहंते काले वल्कल वाससः॥ 50
यद्रोध्यासि महापुण्ये नियमादूर्ध्व संभवः।
आदित्य नुपतिष्ठंते मुनयः संशितव्रताः॥ 51
अग्नि होत्र समुत्पन्न धूम गंध सुगंधिभिः।
सुपुष्प फल भारेण नम्रशाखा समन्वितैः॥ 52
पुण्य वृक्षै रुपेताच पुण्य पक्षि मृगावृतमा
रुद्र क्रोध निरानंदो ब्रह्मानंद मगात्सुतः॥ 53
यतोत्र तेन तत्क्षेत्रं ब्रह्मानंद पुरं विदुः।
विसाम्र तरुबृंदेन निबिडं तत् स्थलं यतः॥ 54
अत आम्रवणं चेति क्षेत्र माहु र्महर्षयः।
अध्यापहारि च प्रोक्तं कहोलक सुतस्य हि॥ 55
२ B मातृ गामित्व संप्राप्त सर्वाघानां विनाशनात्।
मृगे र्विहारशीलत्वा न्मृगंडु रिति यो मुनिः॥ 56
तत्पूजितत्वा त्तल्लिंगं मृगंडीश्वर नामकम्।
ब्रह्मानंदेश्वरं चाहु र्ब्रह्मानंदस्य कारणात्॥ 57
शुद्ध रत्नेश्वरं चेति तल्लिंगं कथ्यते बुधैः।
शुद्ध रत्न स्वरूपेण युगादौ यद्विलोकितः॥ 58

In Public domain. Digitization Muthulakshmi Research Academy

9

यस्मात्तु ब्रह्मणा तीर्थं स्थलेऽस्मिन्निर्मितं पुरा।
तस्मात्सर्वेऽपि तद्विप्रा ब्रह्मतीर्थं प्रचक्षते॥ 59
यदा तत्र स्थले शंभुर्मृगरूपमधीश्वरत्।
तदा प्रभृति तत्क्षेत्रं मृगतीर्थपुरं विदुः॥ 60
मृगतीर्थेश्वरं चेति प्राहुस्तल्लिंगमुत्तमम्।
एतानि पुण्यनामानि यः प्रातः कीर्तयेत्सकृत्॥ 61
सर्वपापविनिर्मुक्तः शिवलोके महीयते।
ब्रह्मतीर्थसरस्नानं मृगशृंगेश्वरदर्शनम्॥ 62
न चाल्पतपसा लभ्यं कोटिजन्मतपोजुषाम्।
त्रिदलं बिल्वमेकं वा तल्लिंगोपरि निक्षिपेत्॥ 63
तत् बिल्वसमं नेतः स्यात् सत्यमेव न संशयः॥ 63
संपूज्यामलवणेश्वरं द्विजमुखे यो ग्रासमात्रं ददत्
केदारे च गयास्थले च महति क्षेत्रे ग्रजन्मायुतम्।
अन्नैस्तर्पिसतः सुपायसघृतक्षीरैः फलं प्राप्नुयात्
तल्लिंगस्य महोत्सवे यदि ददावन्नं न जाने फलम्॥ 64

यस्त्वाशमतटाककृच्छशिकलाचूडस्य तच्छूरैः
सोऽयं नंदनवाटिकापरिसरे --- पदे सर्वदा।
दीअच्चंदनसुप्रसूननिचयैः सोगंध्यदिव्याकृतिः

In Public domain. Digitization Muthulakshmi Research Academy

संक्रीडिष्यत एव हि स्मतटिनी तीरे सरोर्मिः समम

इति स्कांदपुराणे अगस्त्य संहितायां क्षेत्र खंडे

आम्रवण माहात्म्ये प्रथमोऽध्यायः ॥ ॥ ॥

॥ द्वितीयोऽध्यायः ॥

किमर्थमकरोत्पूर्वं मृगंडुस्तप उत्तमम्।

तदाम्रवणमभ्येत्य सौते ब्रूहि सविस्तरम्॥

सूतः-

आसीन्मुनिर्महाभागो मृगंडुरिति विश्रुतः।

सत्यसंधो जितक्रोधो निर्मलो निरहंकृतिः॥

आत्मवत्सर्वभूतानि पश्यन् विमलधीः सदा।

अनपत्यो महातेजा तपसे कृतनिश्चयः॥

क्षेत्राणि विचिनोति स्म तपःसिद्धिकराणि वै।

तत्र तत्र चरन् धीमान् अद्राक्षीन्नारदं मुनिम्॥

तेजसा जितमार्तंडं सर्वज्ञं विजितेंद्रियम्।

पूजयित्वा यथान्यायं आसनादि पुरस्सरम्॥

मृगंडुः प्राह तं वीक्ष्य स्वाभिलाषस्य सिद्धये।

भगवन् मुनिशार्दूल लोकानुग्रह कारक॥

न चास्त्यविदितं किंचित्तव लोकेषु विद्यते।

In Public domain. Digitization Muthulakshmi Research Academy

॥

अनपत्यश्चिरं कालं मह्यमस्मि महामुने।

अस्वाध्यायो यथा विप्रो निरातिथ्यो यथा गृही।

दान शून्यं यथा द्रव्यं तथापत्यविवर्जितः॥ 8

गंध हीनं यथा पुष्पं दयाहीनं यथा तपः।

गुण हीना यथा नारी तथापत्य विवर्जितः॥ 9

चंद्र हीना यथा रात्रिः पद्महीनं यथा सरः।

पक्ष हीनो यथा बाणः तथापत्य विवर्जितः॥ 10

गुण हीनो यथा विद्वान् बुधहीना यथा सभा।

राजहीनं यथा राज्यं तथा + र्जितः॥ 11

लक्ष्मी हीनं यथा गेहं तोयहीना यथा नदी।

भक्ति हीनं यथा चेतः तथा + र्जितः॥ 12

शृंगहीनो यथोक्षाच धृतिहीनो यथो यमः।

हस्तहीनो यथा हस्ती तथापत्य विवर्जितः॥ 13

तस्मादपत्य संप्राप्त्यै ततश्चांते विमुक्तये।

स्थानं ब्रूहि तपः कर्तुं एकांतं च सुतीरगम्॥ 14

मृकंडुनेवं संपृष्टो नारदो मुनिसत्तमः।

मृगंडुं प्राह सर्वज्ञः स्मयमान मुखांबुजः॥ 15

नारदः॥ मृगंडो भवता प्रोक्तं सत्यमेव न संशयः।

In Public domain: Digitization Muthulakshmi Research Academy

पुंनाम्नो नरकाद्यस्मात् पितरं पाति वै सुतः॥ 16
तस्मात्पुत्र इति प्रोक्तः पूर्वमेव महात्मभिः।
ऋषीणां देवतानां च पितृणां च तथैव च॥ 17
पुमाल्लोके त्रयाणां च ऋणेन सह जायते।
यज्ञेन देवान् स्वाध्याय तपसा च ऋषीन् सुतैः॥ 18
प्रीणयित्वा पितॄन् देवान् मनो मोक्षे निवेशयेत्।
अग्निहोत्रं त्रयो वेदा यज्ञाश्च सह दक्षिणाः॥ 19
सर्वाण्येतान्यपत्यस्य कलां नार्हन्ति षोडशीम्।
अपुत्रस्य गृहं शून्य मपुत्रस्यार्जनं वृथा।
अपुत्रस्यान्वयाच्छिन्नो नापवित्रं ह्यपुत्रतः॥ 20
यथा कथंचित्पुत्रार्थं यत्नः कार्यो मनीषिभिः।
पुत्रार्थं यतमानस्य भवतोद्य महामुने॥ 21
शीघ्रं सिद्धिप्रदं पुण्यं क्षेत्रं वक्ष्ये सुतीरगम्।
जाह्नवी यमुना कृष्णा तुंगा गोदावरी तथा॥ 22
भद्रा च नर्मदा चैव सरयूः पापहारिणी।
एवमादि महानद्यः ~~कांतं~~ कांता इव स्वकम्॥ ~~23~~
पारावारं सुगच्छंत्यो वर्तंते बहुधा क्षितौ। 23
तथापि दाक्षिणात्यानां ~~मन~~ पारंपरी वशात्।

In Public domain. Digitization Muthulakshmi Research Academy

कावेरी पुण्यसलिला सह्याद्रि तट संभवा।
दृष्टमात्रेण पापघ्नी सर्वदा सस्यमालिनी ॥ 24
निरंतर महाक्षेत्र मंडिता सिंधुगामिनी।
रसाल पनसाम्राद्यै र्नारिकैलैः समावृता ॥ 25
एकाधि बहुधा भूत्वा चोल क्षोणीः सुरक्षती।
सर्वे सुकृत कर्माणः कावेरी तीर संभवाः॥ 26
कावेरी तोय पानेन निरस्तांतस्तमोगुणाः।
अग्निहोत्र परा विप्रा वेदाध्ययन शालिनः॥ 27
विग्रहं परतत्वस्य त्रिणेत्रं सांब मव्ययम्।
ध्यायंतः पूजयंतश्च कथयंतश्च तत्कथाम् ॥ 28
कालक्षेपं प्रकुर्वंति नच अर्थ गिरः क्वचित्।
मरुद्वृधा तटे जाताः पशुपक्षि मृगा अपि ॥ 29
तत्तोय वात संस्पर्शात् गतिं यांति गरीयसीम्।
किं पुनः स्नान पानानि कुर्वतां मनुजन्मनाम्॥ 30
उत्तरे सरितस्तस्या जंबुक्षेत्रस्य पूर्वतः।
किंचिदीशान भागेस्ति महदाम्रवणं शुभम्॥ 31
गायत्री नाम पुण्यापा वर्तते च शुभापगा।
ब्रह्मणा पूर्वमानीता स्वस्य यज्ञ समृद्धये ॥ 32

गायत्री सरिति स्नात्वा तदाम्र विपिनेश्वरम् ।
सकृन्नत्वा समस्तेभ्यो रोगेभ्यो मुच्यते नरः ।
दीर्घायुष्यं च भवति नात्र कार्या विचारणा ॥ 3
ब्रह्मानंद पुरी नाम ब्रह्मानंद विलायिनी ।
मृगंडो वर्तते तत्र सिद्ध चारण सेवितम् ॥ 3
शुद्धरत्नेश्वरं नाम महालिंग मनुत्तमम् ।
वर्तते तत्र भक्तानां भुक्ति मुक्ति फल प्रदम् ॥ 3
तपः प्रारंभ मात्रेण सर्व सिद्धि करं नृणाम् ॥ 3
सरिद्वर मरुद्वृधा तट मुपेत्य चौते वने
महर्षि गण सेविते द्विपदग्गणैः स्तुते ।
तपश्चर स्वचिन्तयन् हृदि विशुद्ध रत्नेश्वरं
तवाप्सितं मुपपद्यते सपदि भो मृकंडो मुने ॥ 36
8 B कुर्वंति संतो बहुधा तपस्या
मपास्य संसार विचार मत्र ।
केचिद्यजंते क्रतुवर्य जालै-
रीशान माद्यं विधिना यथोक्तम् ॥ 37
इति मुनि रमलात्मा नारदो योगिवर्यः
शुभ गुण मणि सिंधु र्देवलोकादुपेत्य ।

In Public domain. Digitization Muthulakshmi Research Academy

तपसि निहित बुद्धे शंभजार्यो मृगांडो
रुपदिश दमलं तत्क्षेत्र मालोच्य सम्यक्॥ 38

इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये द्वितीयो
ध्यायः॥ ॥ ॥ ॥ ॥

॥तृतीयोऽध्यायः॥

मृगांडुः॥सतां कथमवस्थानं ब्रूहि देवमुने मम।
इति पृष्टो मुनिस्तेन नारद स्तन्मृगांडुना॥
आचचक्षे सतां कृत्स्नं श्रुति स्मृतिषु विश्रुतम्॥
नारदः॥संलक्ष्यभिधीयंते सदा सत्वगुणैर्युताः
तमोभि र्नाभिभूयंते यथा चंडांशु रश्मयः॥ 2
न प्रहृष्यंति संमाने न तप्यंत्यव मानतः।
गंगा ह्रद इवाक्षोभ्याः संत स्तिष्ठंति सर्वदा॥ 3
आत्म वत्सर्व भूतानि संतः पश्यंति संततम्।
परोपकार निरताः परदुःखासहिष्णवः॥ 4
विमुक्त परनिंदाश्च गतासूया गतस्पृहाः।
वश्येंद्रिया: क्षमा युक्ता जितक्रोधा दयालवः॥ 5
शत्रुमित्रेषु तुल्याश्च नरा गोप हतेन्द्रियाः।

In Public domain. Digitization Muthulakshmi Research Academy

स्वाश्रमाचार निरतास्तत्रैवातिथि पूजकाः।
कायेन मनसा वाचा परहिंसां न कुर्वते॥ 6
धर्मशास्त्र प्रवक्तारो धर्मैक प्रवणास्तथा।
माता पितृ गुरूणां च परिचर्यासु निष्ठिताः॥ 7
सा कुर्वंति पुराणानि शृण्वंति श्रावयंति च।
4A वेदार्थानां प्रवक्तारो वैदिकं स्थापयंति च॥ 8
यदृच्छा लाभ संतुष्टाः परस्व विगत स्पृहाः।
परदारान्न पश्यंति मनसापि कदाचन॥ 9
हितोपदेशं कुर्वंति सर्वेषां हित कारिणः।
सदा कुर्वंति सत्कर्म परलोकैक चिंतनाः॥ 10
आपत्सु न विमुह्यंति संतो निश्चित बुद्धयः।
चत्वारिंशच्च संस्कारा ब्राह्मणानामिह स्मृताः॥ 11
पाकयज्ञा हविर्यज्ञाः सोमयज्ञा इति त्रिधा।
पाकयज्ञा इतीर्यंते जातकर्मादिकाः क्रियाः॥ 12
सप्तधा हि हविर्यज्ञा अग्निहोत्रादिकाः क्रियाः।
अग्निष्टोमादि संस्थाभिः सोमयज्ञाश्च सप्तधा॥ 13
निषेकादि श्मशानांतांश्चत्वारिंशत् क्रिया अपि।
तत्तत्कालेनुतिष्ठंति संतो वेदार्थ वेदिनः॥ 14

In Public domain. Digitization Muthulakshmi Research Academy

मैत्री सर्वेषु भूतेषु नैष्ठुर्यं न कदाचन।

निर्ममा निरहंकाराः सर्वद्वंद्व विवर्जिताः॥ 15

ईशार्चनां विना संतो न खादंति पिबंति च।

अनर्चयित्वा गौरीशं यो भुंजीत नराधमः।

स भुंक्ते विट् कृमीनेव मलं भुंक्ते सकोणपम्॥ 16

येवार्चयंते शशिखंड चूडं

यथा विधानं शत रुद्र मंत्रैः।

ते घातकानामिह कोटिभिश्च

प्रयांति मुक्ताः शिवलोक मस्मात्॥ 17

शिवार्चनायाः सदृशं न किंचित्

पवित्र मस्तीह परत्र वापि।

सकृत्प्रणामं सकृदर्चनं वा

किं कुर्वतो यज्ञशतै व्रतै र्वा॥ 18

यः शांतयांतं प्रणवेन युक्तं

ब्रुवन् प्रदोषे शिवलिंग मूर्तिम्।

पश्येत् स मुक्तो वृषणं वृषस्य

स्पृशन् कराभ्यां च विषाणमध्ये॥ 19

यः प्रातश्चंद्रचूडं प्रणमति स भवेत्

In Public domain. Digitization Muthulakshmi Research Academy

स्वर्गभाङ् मुक्तपापो

मध्याह्ने वाजिमेध क्रतुफल गुणभाक्

....

यः सर्व लिंगमूर्तिं भजति शुभमनाः

शैव पंचाक्षरेण

क्षीणांहा उक्त काल त्रितय फलमपि

प्राप्य साक्षाच्छिव : स्यात् ॥ 20

न च प्रमाद्यंति कदापि संतो

महेश पूजा चरणे मयोक्ते ।

न सांब मूर्तेरधिकोस्ति देव

स्त्रिविष्टपे नास्ति समश्च कश्चित् ॥ 21

एताव जन्म साफल्यं देहिनामिह शंकरे

भक्तिस्तदीय भक्तेषु धर्मैर्वाचा समर्चनम् ॥ 22

स्नानं संध्या जपो होमो देवतानां च पूजनम्

आतिथ्यं वैश्वदेवं च षट् कर्माणि दिने दिने ॥ 23

प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा

संप्राप्तो वैश्वदेवांते सोतिथिः स्वर्ग संक्रमः ॥ 24

काष्ठ भार सहस्राणि घृत कुंभ शतानि च ।

In Public domain. Digitization Muthulakshmi Research Academy

अतिथि र्यस्य भग्नाशा स्तस्य होमो निरर्थकः।
इति संतो विजानंतः पूजयंति तथातिथिम्।
अयने च व्यतीपाते विषु संक्रमणेष्वपि ॥ 2
नभस्य कृष्ण पक्षस्य ग्रहणे चंद्र सूर्ययोः।
अमावास्यास्वपि तथा माघ मासेष्टकास्वपि॥ 2
समुद्दिश्य पितॄन श्राद्धं संतः कुर्वंति भक्तितः।
एवं सत्कर्मभि र्नित्यं संतः क्षपित कल्मषाः॥ 2
तीर्थाटनं च कुर्वंति पुण्य काले विशेषतः।
आरोपयंति सद्वृक्षान तटाकोद्यान कारिणः॥ 2
देवालयं द्विजानां च कारयंति मठानपि।
प्रपां विधाय पानीयं निदाघे दापयंति च॥ 2
विभवे सति दानानि संतः कुर्वंति निस्पृहाः।
नॄणां जीवितमैश्वर्यं विद्युल्लोलं नच स्थिरम्॥ 3
६ A इति मत्वा महांतो हि सततं संशित व्रताः।
उपासते महादेवं नीलग्रीव मुमापतिम् ॥ 3
एवं सदाचारगतिं मृगांको -
रुक्त्वाथ तस्मै स मुनि प्रवर्यः।
अष्टांग योगं च यथा क्रमेण

In Public domain. Digitization Muthulakshmi Research Academy

सम्यङ् निगद्य प्रययौ स्वधाम ॥ 33

इति स्कान्दे पुराणे अगस्त्य संहितायां क्षेत्र
खण्डे आम्रवणमाहात्म्ये तृतीयोऽध्यायः ॥५॥

अथ चतुर्थोऽध्यायः ॥

अत्र देव मुनौ तस्मिन् शिव भक्त शिखामणौ ।
बिभ्राणो महतीं वीणां स्वर्याते देवपूजिते ॥ 1
मृगण्डु मुनि शार्दूलो मुनिवर्य निषेवितम् ।
सिद्ध चारण संघैश्च सेवितं परमाद्भुतम् ॥ 2
कावेरीतट मभ्येत्य विचित्र तर वालुकम् ।
तत आम्रवणं तस्या गायत्र्याश्चान्तरे तटे ॥ 3
भ्राजमानं शुभै र्वृक्षैः सुपुष्प फल सन्ततैः ।
भ्रमद्भ्रमर संघुष्टं कूजद्विहग संकुलम् ॥ 4
नृत्यन्मयूर निकरं सारंग चमरी वृतम् ।
क्रौंच हंस प्लवाकीर्णैः झष कच्छप संकुलैः ॥ 5
शोभितैश्च सरोवर्यैः सुशुभी कृत भूतलम् ।
दृष्ट्वा तत्र महालिंगं स्वयं व्यक्तं सनातनम् ॥ 6
रुद्र रत्नेश्वरं नाम त्रिषु लोकेषु विश्रुतम् ।
अनेक जन्म संसिद्धैः पूजनीयं प्रयत्नतः ॥ 7

In Public domain. Digitization Muthulakshmi Research Academy

यजंति तत्र तल्लिंगं ज्ञान यज्ञै स्तपोधना:।
अग्नि होमादिभिर्यज्ञै यजंते तत्र कर्मिण:॥ 8
तदेतल्लिंग सांनिध्यात् तत्क्षेत्र मति पावनम्।
अणुमात्र कृतो धर्मो वर्धते वटबीजवत्॥ 9
तन्महालिंग माराध्य नियमेन समाहित:।
प्राणायामेन पवने प्रत्याहारेण चेंद्रिये॥ 10
वशीकृते तत: कृत्वा स्थिरं चेत: परात्मनि।
तपश्चक्रे महातेजा स्तस्मिन्नाश्रवणे शुभे।
पादांगुष्ठेन संस्पृश्य भूतलं विजितेंद्रिय:॥ 11
धवल वपुषमिंदो मंडले सन्निविष्टं
६ B भुजग वलय हारं भस्म दिग्धांग मीशम्।
हरिण परशु पाशं चारु चूडावतंसं
हृदय कमल मध्ये संततं चिन्तयान:॥ 12
निराहारो निरालंबो जटावल्कल संयुत:।
ततापं परमं तीव्रं तपस्तत्र समाहित:॥ 13
ग्रीष्मे पंचाग्नि मध्यस्थ: शिशिरे जलमध्यग:।
उत्तान शयने हैमे तुहिनै रभिवर्षित:॥ 14
तन्मयेन ततो भूत्वा स्थाणुवन्निश्चलो भवत्।

In Public domain. Digitization Muthulakshmi Research Academy

ततो देवाः समुद्विग्नाः पुरंदर पुरोगमाः ।
मृगंडोस्तप उद्वीक्ष्य स्वस्थान च्युति शंकया ॥ 15
रक्षांसि प्रेरयामासु र्घोररूपाणि सर्वशः ।
अभ्युतोगत शस्त्राणि संज्वालक बलानिच ॥ 16
तानि तं भीषयामासु र्व्यदाय वदनानि च ।
मुमुचु र्दीप्त शस्त्राणि तस्योपरि समन्ततः ॥ 17
नत मन्यव पर्यंत तानि शस्त्राणि किंचन ।
समाहित मनाः शंभौ सहि किंचिन्न हृष्टवान् ॥
अथ कामं समाहूय सुतामा देववल्लभः ।
मंदानिल वसंताद्यै रप्सरोभिश्च संयुतम् ॥
संमान्य प्रेषयामास तपः प्रत्यूह वांछया ।
स कथंचित्क्षितिं गत्वा मन्मथो गुण संपदा ॥ 2
मुमोच तस्मिन् संधाय प्रसून मय मार्गणम् ।
ववौ मंदानिलस्तत्र कोकिलो मंजुनिस्वनः ॥ 2
अकूजत् हृदय ग्राही सौरभ्य मभवन्महत् ।
वसंतेन समावृत्य सुमनोभिः समंततः ॥ 2
पीन श्रोणी स्तन प्रांतं दर्शयंतो प्सरो गणाः ।
जगुः कलं च वीणायां समीपे तस्य वै मुनेः ॥ 2

ततो विकार मापेदे मृगंडु र्हृदि किंचन।

किमेतदिति सोपश्यत् ककुभश्च समंततः॥ 24

आर्द्रेक्षु चाप संयुक्तं पुरतः समवस्थितम्।

श्यामावदातं तं कामं ददर्श सुमनोहरम्॥ 25

ततः क्रोधसमाविष्ट स्तमशाप मुनीश्वरः।

निर्दयो मां तपस्यंतं शरै र्यस्मात् ताडयः॥ 26

अतस्त्वं भव लोक विगर्हितः।

यश्चेंद्रः प्रेषयामास विकारयितु मात्मनः।

त्वामिहाश्रमे सोपि कामेन विकृतो भवेत्॥ 27

यदा त्वं प्राप्य गौरीशं शुद्ध रत्नेश्वरं बृषे।

पूजायिष्यति तच्छापान्मुक्तो भवति शोभनः॥ 28

अथ तद्भय संत्रस्ता वसंताप्सरो गणाः।

भ्रष्ट माल्यांशुकास्तत्र क्षिप्त वीणाः प्रदुद्रुवुः॥ 29

ततस्ते निष्फलारंभा देवाः शक्र पुरोगमाः।

ब्रह्माणं शरणं गत्वा मृगंडोश्चरितं महत्॥ 30

तस्मै निवेदयामासु र्भय विह्वल चेतसः।

ततस्तानमरान् प्राह ब्रह्मा लोकपितामहः॥ 31

मा भैष्ट यूयं भो देवाः नैष प्रार्थयते दिवम्॥

In Public domain. Digitization Muthulakshmi Research Academy

अन्यदेव मनोभीष्टं मृगंडो भाविवात्मनः।
तमभीष्टं च फालाक्षः शंभुर्देवः सनातनः॥ 32
पूरयिष्यति शीघ्रेण स्वयं गत्वा मुनीश्वरम्।
अतस्त्यक्त्वा भयं यूयं दिवं यात सुरेश्वराः॥ 33
अथ तद्वचनं श्रुत्वा प्यानंदं प्राणिपत्य च।
स्वं स्वं स्थानमवापुस्ते निर्भयाश्च दिवौकसः॥ 34
स मुनिरपि महात्मा तत्र भूयः सुचेताः
हृदय दहर कोशे सच्चिदानंद रूपम्।
प्रणवमयमतर्क्यं भावयन् सांबमूर्तिं
स्थिरतरमभवच्च प्राणरोधं वितन्वन्॥ 35
इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्र-
खंडे आम्रवण माहात्म्ये चतुर्थोऽध्यायः॥४॥
॥ पञ्चमोऽध्यायः॥
पाराशर्य वरच्छात्र ब्रूहि सूत नः परम्।
मार्कंडेयं कथं प्राप मृगंडुः पुत्रमात्मनः॥ 1
सूतः॥ एवं बहुतिथे काले नियमेन कृशात्मनः
मृगंडोस्तपसा याते रुद्र स्तेशसन्निधौ॥ 2
लिंगा प्रादुरभूत्तस्मा च्छिवश्चारुतराकृतिः।
7
B यथा प्यात स्तथा तस्य पुरतो वै महामुनेः॥ 3

In Public domain. Digitization Muthulakshmi Research Academy

मुनिश्च स्वहृत्पंभोजे न च पश्यन्नुमापतिम्।
उन्मिमेष दृशौ शीघ्रं पुरतस्तस्य लोकत ॥ 4
उदिताकंशताकारं सनकाद्यैरभिष्टुतम्।
निटिलांत स्फुरन्नेत्रं कंठेकालं वृषध्वजम् ॥ 5
वामांग सन्निविष्टाद्रि तनयाश्लिष्ट विग्रहम्।
कपर्दिनं विराजन्ति शूलाजगव कार्मुकम् ॥ 6
वरकर्पूर गौरांगं परिणद्ध गजाजिनम्।
शशिखंड जटा चूडं शारदाभ्र चयाकृतिम् ॥ 7
मंदस्मित कृपापांगं मंजुलाधर पल्लवम्।
तं विलोक्य महादेवं देवदेवं जगत्पतिम् ॥ 8
हर्षबाष्प कलाकीर्णः सरोमांचित विग्रहः।
उपव्यवौ त्वरया भक्त्या प्रणिपत्य कृतांजलिः ॥ 9
नमस्ते रुद्र मन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने कराभ्यां ते नमो नमः ॥ 10
याते रुद्र शिवा तनूः शांता तस्यै नमोनमः।
नमोस्तु नीलग्रीवाय सहस्राक्षाय ते नमः ॥ 11
सहस्र पाणये तुभ्यं नमस्तुभ्यं कपर्दिने।
शूलपाणे नमस्तुभ्यं नमस्ते घोरु धन्वने ॥ 12

In Public domain. Digitization Muthulakshmi Research Academy

पशूनां पतये तुभ्यं क्षेत्राणां पतये नमः।
नमस्ते वामदेवाय नमस्ते पापहारिणे॥ 13
नमस्ते गदिने तुभ्यं नमस्ते विश्वमूर्तये।
नमः शिवाय सांबाय ब्रह्मणे सर्वसाक्षिणे॥ 14
हराय हरिरूपाय नमस्ते तिग्मतेजसे॥ 14
श्रीमन् शशांक शकलांकित मौलि भाग
क्षोणीधरात्मज तनया स्थित वाम भाग।
भूषायिताहि गण वल्लभ चारु भोग
श्रीशुद्ध रत्न वर लिंग मम प्रसीद॥ 15
त्वय्येव मे दृढतरा हृदि भक्तिरस्तु
त्वत्पाद पंकज युगे नुतयेस्तु मूर्धा।
त्वन्नाम जाल पठनेस्तु गिरीश वाङ्मे
त्वत्पूजनाय विनतं सकलांगमस्तु॥ 16
जातस्य यस्य वदनाब्ज विलोकनेन
मुक्तः शुचिः पितृऋणात् सुखभाक् भवानि।
तत्तादृशं शुभमपत्य मुदारकीर्ति
देहाश्रितस्य भवदंघ्रि मुमापते मे॥ 17

In Public domain. Digitization Muthulakshmi Research Academy

तद्वाक्यमेव भगवान् शशिरवंड चूडः
श्रुत्वा तदीय तपसा स्तुतिभिश्च हृष्टः ।
तं वीक्ष्य तापसवरं प्रणतार्ति हंता
वाचं जगाद धवलीकृत दिक्प्रदेशः ॥ 18

किं षोडशाब्द तनयं सुगुणं सुशीलं
मेधाविनं समुपयास्यसि कीर्तिमंतम् ।
दीर्घायुषं गुण विहीन मभाग्यवंतं
मूढं समेष्यसि सुतं वद भो मृगंडो ॥ 19

तच्चंद्र मौलि वचनं स निशम्य विप्रः
किंचि द्विषण्ण हृदयः प्रविलोच्य चित्ते ।
शंभो ददस्व सुगुणं वरकीर्तिमंतं
पूर्वोक्त पुत्र मिति तं निजगाद तत्र ॥ 20

इशो निगद्य मुनिवर्य तथैव दत्तः
पुत्रो मया तव शुभ स्तपसो विरम्य ।
गच्छाश्रमं त इति तत्र मृगंडु मेनं
स्वं धाम दैवतगणैः प्रणतो जगाम ॥ 21

सोयं मृगंडुरपि तत्र वरं समेत्य
स्वस्योटजं प्रति गतः सह भार्यया च ।

In Public domain. Digitization Muthulakshmi Research Academy

पुत्रोदयं प्रतिनिरीक्ष्य गृहेवतस्थे

तद्वैहृदं समवलोक्य च हृष्टचेताः ॥ 22

शुभ्रे दिने शातभिषग्वरभेन युक्ते

केंद्रे गुरौ लसति चंद्रमसा समेते ।

लग्ने शुभे हि सुषुवे प्रवरं कुमारं

पत्नी मुनेर्वरं गुणं च मरुद्वती सा ॥ 23

नेदुः प्रसेदु र्ननृतु स्तदानीं

बाद्यानि काष्ठाः सुरयोषितश्च ।

जगु ववर्षु र्दिवि किन्नराश्च

प्रसून जातं सुरसिद्ध संघाः ॥ 24

शशलाघिरे तं तनयं मुनींद्राः

साक्षाच्छिववीर्यं दययावतीर्णः ।

तस्याथ पिता जननक्रियादीन्

ते कारयामासुरति प्रहृष्टाः ॥ 25

स तेजसा संववृधे यथेंदु

र्वलक्षपक्षे कलया समेतः ।

मृगांडुरध्येन मवेक्ष्य सूनुं

सहैव पत्न्यातितरां जहर्ष ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्रखंडे आम्रवण माहात्म्ये पंचमो-
ध्यायः ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५

॥ षष्ठोध्यायः ॥

ऋषयः- सौते मृगंडुतनयः कथमप्यदीर्घ-
ण्यायूष्ययं परिमितः किल षोडशाब्दैः ।
आपोहि तस्य चरितं वद नः सुकीर्ति
मस्माक मद्य कृपया परया मुनींद्र ॥ 1
वक्ष्यामि तस्य चरितं तरुणेंदु मौले
रायुर्गणं मुनिवराः समुपागतस्य ।
यूयं समाहित हृदोद्य निशामयध्वं
तत्पुण्य चारुचरितं सकलार्थदं च ॥ 2
दृष्ट्वै ममस्य पितरौ तनयं कदाचित्
आसन्न षोडश समं रुदितावभूताम् ।
आकर्ण्य तत् क्षितिरुहः परिदेवनं तत्
चिच्छिदिरे सलतिकाः कुसुमाम्बुपातैः ॥ 3
पुन्नाम तीव्र विरयानल वारिवाह
लावण्य शील गुण रत्न नमहंव शशे ।

In Public domain. Digitization Muthulakshmi Research Academy

त्वद्वक्त्र बिंब गलितामृत पान पुष्टा-
वावां कथाव तमसा ग्रसिते त्वदास्ये॥ 4
बालेति कोमल गिरं क च वा कुवाव
यत्ते मृणाल लतिका समशीतलांगम्।
आश्लिष्य गाढ मुपयाव कुतस्तनूज
सांद्रं भवेत् सुखमिदं सुकृतैक लभ्यम्॥ 5
ताविथमर्भकरुचा जनिताश्रुपात
संघात जात सरितो महति प्रपूरे।
निर्मज्य तत्तट मुपेतु मपेत भाग्यौ
मूर्छा मवापतु रुभौ सुतरां सुतार्तौ॥ 6
सोयं निशाम्य पितरौ स्वकृते रुदंतौ।
दुःखाश्रुशुक्षणि शिखा परितप्यमानौ।
गंभीरया नवसुधारस पूर वाचा
पित्रोः शशाम परिताप मिमौ प्रणम्य॥ 7
पैतामहस्य मम फाललिपेर्वशेन
प्राप्तं च शामनभयं गणये न किंचित्।
युष्मत्पवित्र तपसा कृतरक्षणं मां
किंचिन्न वीक्षितुमपि क्षमते कृतांतः॥ 8

In Public domain. Digitization Muthulakshmi Research Academy

तं कालकालमखिलेश्वरमिन्दुचूड
मार्तार्तिभंजन विधौ कृतदक्षदीक्षम् ।
एकेषुणैव विनिहत्य पुरत्रयं च
संरक्षित त्रिभुवनं शरणं व्रजामि ॥ ९

तं कालकूट गरल प्रवहन्तिलोकी
व्याव त्सु किंकिमिति किंन्विति दैवतेषु ।
पीत्वा जुगोप सहसा जगतीः सखेलं
वेलामतीत करुणं शरणं व्रजामि ॥ 10

क्रूरं महाघ्र जटिलं हृत सर्व लोक
संपत्कदंब मवधीद्वनिमेष शत्रुम् ।
यो वा जलंधरमजो निजपादरेखा
चक्रेण विश्वभिषजं शरणं व्रजामि ॥ 11

उद्दालकस्य तनयं व्रतिनां वरिष्ठं
यः श्वेतकेतु मवनौ यमपाशजुष्टम् ।
गोपायति स्म हि तत्रैव शिलादपुत्र
तत्ते कृतांत वदनाच्छरणं व्रजामि ॥ 12

यत्साध्वसादुदयमस्तमयं च कुर्वन्
बंभ्रम्यते भ्रमिरिवैष सदैव पूषा ।

In Public domain. Digitization Muthulakshmi Research Academy

चंचर्यते पवन एष धनंजयोपि
देदीप्यते ति महं शरणं व्रजामि ॥ 13
यद्देव देव मिह लिंगतनौ समर्च्य
ब्रह्मादयो निज मनोरथ माप्नुवंति ।
तद्ब्रह्म काल महसा प्राविलीढ कामं
शर्वं सनातन महं शरणं व्रजामि ॥ 14
अहं भवंतौ यदि चार्च मार्यौ
भ्रातश्च पित्रो र्युवयो रहं स्याम् ।
विजिस्य शीघ्रं शमनं वराकं
आयुर्गणं यामि पुन मरातेः ॥ 15
मा शोचतं मां प्रति किंचिदार्यौ
यद्वा कथंचि च्छशि खंड चूडम् ।
अभ्यर्च्य दीर्घायु रहं प्रपत्स्ये
कुर्यात माशीर्वचनं तथाद्य ॥ 16
तदीय वचनामृतं श्रुतिपुटेन सम्यक् तदा
निपीय जहतुः शुचं निज सुताय यन्मृत्युजम् ।
ततः प्रमुदितानतौ हृदि विचिंत्य शंभोः कथां
सुतं प्रति तमूचतुः प्रणय गर्भ वाचं शिवाम् ॥ 17

In Public domain. Digitization Muthulakshmi Research Academy

विपद्गत पयोद मेवामृतं
त्वद्भ्रू जलधेरभूदहह पूर्णिमा चन्द्रमाः।
अपायरहितं भवेत्तव शरीर मेतद्यथा
तथैव शरणं व्रज त्रिपुर वैरिणं सत्वरम्॥ 18
न चान्यदवलोकये सुत जगत्त्रये दैवतं
कृतांत वशमेयुषः श्रितजनस्य वा रक्षणे।
यमेव निगमो नमो वचन युक्तनामभिः
स्तवीति भृशमादरा च्चरणमाव्रजेः शंकरम्॥ 19
एवं तयोर्हृदि सुधार्द्र मयं प्रकल्प्य
श्रीकंठ मिंदु कलया विहितावतंसम्।
आराधितुं कृतधिया समुपेत एष
आनम्य तच्चरणयो रिदमाह भूयः॥ 20
प्रत्यक्ष दैवत मिमौ पितरावनर्च्य
यो वा परोक्ष मिह दैवत मर्चयेत।
स पायसं मधु सुशर्करया समेतं
प्राप्तं विहाय सहि लेढि करस्य पृष्ठम्॥ 21
यत्या कथंचिद्भवदंघ्रि पद्मयोः
समर्चितुं मे भगवान् महेश्वरः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रसीदति प्रार्थित कामनामपि
प्रदास्यति क्षिप्र मवश्यमेव हि ॥ 22

यस्या पराज्ञ हत पौरुष शक्तिरासीत्
विश्वस्य सृष्टि करणे द्रुहिण: पुराण:।
यस्यार्चनादधिगत: पुनरात्मशक्तिं
तल्लिंग माम्र विपिनेत्र चकास्ति नित्यम् ॥ 23

यत्पाद पंकज युगीं स्फुट पंकजौघै:
अभ्यर्च्य गौतम सती व्यभिचार जातम्।
वैरूप्य माशु विजहौ नमुचे रराति -
स्तल्लिंग माम्र विपिनेत्र चकास्ति नित्यम्॥ 24

यत्पूजया परिवृढौ दिवि पुष्पवंतौ
वन्ह्याग्नि शाम भवतां सुचिरेण तात।
रत्नाकरत्व मगम ज्जलधिश्च पूर्वं
तल्लिंग माम्र विपिनेत्र चकास्ति नित्यम्॥ 25

यच्चक्षुद्र रत्नमय मत्र चकास्ति लिंगं
वांछाधिक प्रदमिदं सुतरां तथापि।
मत्कार्य मत्र तपसा युवयोर्न सह्यं
अन्यत्र यामि शिव मर्चितु मावशप्यै ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

क्षेत्राणि सन्ति पुरतो भुवि शूलपाणेः
पुण्यानि पुण्य विपिनान्यभि रुचिकृतानि ।
स्वायंभुवान्यपिच लिंग शतानि सन्ति
तीरे कवेर जनुषः सकलार्थदानि ॥ 2

प्राच्यां दिशि प्रथित पुण्यतम स्थलेऽह-
मभ्यर्च्य शर्वमजरं शमनं विजेष्ये ।
मा खिद्यतं किमपि मां प्रति तात मातः
स्वस्थौ युवां भवतमत्त कृताशिषो मे ॥ 29

ततः पितृभ्यां कृत मंगलाशी
र्वैरोषधीभिश्च सहाक्षताभिः ।
तत्पादपद्मान प्रणिपत्य सम्यक्
ततः प्रतस्थे विजये मुहूर्ते ॥ 29

इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्र खंडे आम्रवण माहात्म्ये षष्ठोध्यायः ॥ ६ ॥

।

ऋषयः ॥ प्रस्थाय किं वा कृतवान् मृगण्डोः
सूतः क वाऽगच्छदयं महात्मा ।
आचक्ष्व सम्यक् विदुषां वरिष्ठ

In Public domain. Digitization Muthulakshmi Research Academy

त्वं वेत्सि सर्वं हि गुरोः प्रसादात् ॥ १

सूतः॥ ध्यायन् सुधांशुकलया कलितोत्तमांगं
सोऽयं मृगांडुतनयोऽथ यदा प्रतस्थे ।
अत्रांतरे सुरमुनि र्मुनिपुत्र भाग्यात्
आयादसीम महिमा हिमभा नभस्तः॥ २

तं नारदं मुनिवरं मुनिवर्यपुत्रः
संवीक्ष्य तस्य पदयोः प्रणनाम भक्त्या ।
तस्याशिषं मुनिरुदाहृत सादरेण
दीर्घायुरेत्य भव सौम्य सुखं चिराय ॥ ३

तत्तापसोत्तम मुखाद्गलिताशिषं तां
श्रुत्वा स मेखलिवरो मुमुदे नितांतम् ।
लब्धं मया सुचिरमायुरहो द्विजाशी
लोके ह्यभेद्य कवचा किमुतेदृगाशीः॥ ४

आयुर्ददाति विपुलं श्रियमातनोति
वाचं ददाति नितरां सदसि प्रगल्भाम् ।
कीर्तिं तनोति विमलां विधुनोति पापं
संतान शाखिबहो महतां हि संगः॥ ५

एवं मुदं हृदि समेत्य मुनेः कुमारः

In Public domain. Digitization Muthulakshmi Research Academy

प्रह्व: कृताञ्जलि - - - वाच देनम् ~~॥ ६~~ ।

भो तापसेंद्र भवदागमनं ममाद्य
मन्ये चिराय महते ऽभ्युदयाय नूनम् ॥ ६

प्राक् सूचितं भगवता शशिशेखरेण
श्रेयो - - - - - - - स ~~श्रयम्~~ ॥ ७ ॥

यस्मात् भवानिह हरेः पदमेत्य वान्मे
साक्षाच्छिवापर तनु स्तपसां निधानम् ॥

भवादृशा भागवता निषेव्या ये
ये - - - - - - - - - - - ॥ ८

संदर्शना भाषण संगतिभ्य:
संत: समुद्धर्तु मिमान् विमूढान् ॥ ८

१ थी स्थानेषु तीर्थेषु वने वसंति
विमुक्त संगा अपि शुद्ध सत्वा: ।
पुनंति पापाद्वितरंति कामान्
इत्थं न देवा उरु कालतस्ते ॥ ९

एवं ब्रुवाण मवलोक्य मुने स्तनूजं
सौपर्णो मुनि रुवाच - - - - ।

- - - कुमार तव हृद्गत कार्य मद्य

In Public domain. Digitization Muthulakshmi Research Academy

वक्ष्ये तदाप्ति विषये महितं ह्युपायम् ॥ 10

कर्मानुगुण्यं फलमस्य जंतो

र्ददाति शंभुर्हृदि वर्तमान :।

कल्याण - - - - - -

... पैति लोके मुनि पुत्र सत्यम् ॥ 11

अतस्त्वदीयस्य पितुर्हि कर्मणा

न पूर्णमायुः समभूत्तवाधुना ।

जन्मांतरे कोरकितैः पिता तव

प्रसून जालै - - मार्चयत ॥ 12

वृंत श्लथैः पर्युषितैरपक्वैः

शिवो नचार्च्यो मुकुलैश्च पुष्पैः।

फलै र्नवीनैश्च तदीय पत्रै

स्तेषामभावे च फलैः शिवोर्च्यः॥ 13

कर्ता फलं प्राप्य त एव कर्मणां

शुभाशुभानामपि कालपाकत :।

यथा ऋतौ संभवति क्षितीरुहैः

संप्राप्यते पुष्प फलोद्गमः स्वयम् ॥ 14

स एव शर्वः पशु पाश मोचको

In Public domain. Digitization Muthulakshmi Research Academy

विमोचनायार्हति सर्व कर्मणाम् ।
बंधस्य वत्स क्षपितांश्च संचया
भवंति पूर्वे शिव मर्चयित्वा ॥ 15

स एव शर्व स्त्रिगुणात्म मायया
सृजत्यवत्यत्ति च हंति निर्गुणः ।
विभिन्नवद्भाति गुणस्थ भेदतो
ब्रह्मेति शास्तीति च रुद्र इत्यसौ ॥ 16

तं देवदेव कृपया सहितं त्रिणेत्रं
शीतांशु चारु कलया कलितोत्तमांगम् ।
आराध्य सम्य गमितायु रुपेहि वत्स
विष्णोः पदादुपरि यस्य पदं वरेण्यम् ॥ 17

इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये सप्तमो-
ध्यायः ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

सूत शैव कथाः पुण्या मादृशो लोकमलापहाः ।
को वा तृप्येत ताः श्रुत्वा तद्वृत्त चरितेषु वा ॥ 1
मार्कंडेयो महान् धीरः शिवभक्ताग्रणीः सुधीः ।
ततः किमकरोत्तस्मै स देव मुनिराह किम् ॥ 2

In Public domain. Digitization Muthulakshmi Research Academy

सूत:॥ नारदं प्रणिपत्यासौ मृगंडु मुनि संभवः॥
प्रश्रयावनतो भूत्वा भूयः पप्रच्छ सादरम्॥ 3

मार्कंडेय:॥ न ज्ञातमस्ति भवतां मुनिवर्य किंचित्
क्षेत्रं कवेर तनयाश्रितमत्र वाच्यम्।
यत्प्राप्य दीर्घतरमायुरहं महात्मन्
प्राप्स्यामि निर्जितयमो गिरिशार्चनेन॥ 4

श्रुत्वा मृगंडुसुतवाक्यमयं पुराणो
गीर्वाणि तापसवरः करुणापयोधिः॥
आलोच्य किंचिदिदमाह सुभक्तियुक्तं
देवे सुधांशु कलया कलितोत्तमांगे॥ 5

नारद:॥ क्षेत्रं महत्तरमितो दशयोजनान्ते
शैवं निलिंप निकुरुंब निषेव्यमाणम्॥
पूर्वाब्धेस्तट भुवि प्रचकास्ति नित्यं
श्वेताटवीति जगति प्रथितं पुराणम्॥ 6

यद्ब्रह्मणोपि निज मान शतायुरन्ते
निर्वाण भूमिरत एव तदस्थि भस्म।
श्वेतं वनं भवति तत्प्रथितं तथैव
तीर्थ त्रयेण सहितं तदिदं विभाति॥ 7

यस्तत्र पुण्यविपिने निदधाति पादं
तस्यं निधास्यति पदं शमनस्य मूर्ध्नि ।
तत्क्षेत्र वैभवगतिं न सहस्र मूर्ध्ना
शेषेण चापि गदितुं मुनिपुत्र शक्या ॥ 8
तत्र क्षितौ द्रुहिण कोटि करोटि मालः
शीतांशुखंड समलंकृत मौलि भागः ॥
तस्यंत चिंत्य महिमा मुनि बृंद सेव्यो
विद्योततेऽद्रि सुतया वरलिंग मूर्तिः ॥ 9
तस्योत्तरे प्रवहती ——— णि कर्णिकाच
सौगंधि पद्म वर कैरव जात जुष्टा ।
यस्यां सकृत् स्नपन मात्र विधूतपापा
गच्छंति शैव पदवीं प्रमथैर्निषेव्याम् ॥ 10
दीर्घायु कुरेष्यति ~~भवान्~~ तपसा महेशं
आराध्य तत्र विपिने शमनं विजित्य । जि
ब्रह्मावसान समयेपि जलौघ मध्ये
त्वं संप्लविष्यसि तत्वां भासि जीर्णपर्णे ॥
एवं निगद्य तपसे कृतनिश्चयाय
तस्मै मृगंडु तनयाय सुमेखलाय ।

क्षेत्रं तपश्चरणयोग्य मुदारकीर्ति-
वैहायसं पदमगाद्यमिनां वरेण्यः॥ 12
ततः सुसंहृष्टहृदा समन्वितः स्वकार्यसिद्धिं
समुपेतवानिव। जगाम तच्छ्वेतवनं मह-
त्तरं मृगैस्तु पुत्रैः शकुनैश्च शोभनैः॥ 13
जप्येश्वर क्षेत्र मुदार वैभवं
समेत्य तस्मिन् प्रणिपत्य शंकरम्।
स कुंभघोणं समवाप्य वेगतो
मध्यार्जुनं प्राप्य मयूरनाथमैत्॥ 14
विशुद्धसत्वै मुनिभिर्महात्मभि
समर्चयद्भिः शशिखंड मण्डनम्।
अनोकहैः सत्फलभार सन्नतै-
र्ययौ सुरम्यं विपिनं सपांडरम्॥ 15
ध्यायंति केचिद्धरमीलिताक्षा
हृदब्ज मध्ये तपसा वदाते।
दुग्धेंदुचूडं फणिवर्य भूषं
कांताब्ज देहं शितिकंठ कठम्॥ 16
केचित्तपश्यंति दरीषु शोभना-

In Public domain. Digitization Muthulakshmi Research Academy

एकांत माश्रित्य विधूत कल्मषाः।
आत्मान मेकं परिशुद्ध तत्वं
कृतासना निश्चल देह यष्टयः॥ 17
केचित्त जुह्वति हविः कृत वेदिकायां
वैतान शुष्मणि जुहूप भृतादि पात्रैः।
केचित्समर्च्य शिवलिंग मुमासहायं
नृसंति तस्य पुरतो विवशा स्तुवंतः॥ 18
अलोकयत्तत्र सुशोभनं महत्
लिंगं स्वयं व्यक्तमुमा समाश्रितम्।
१२ A गंधर्वयक्षामर चारणै र्नुतं
विमुक्ति कन्या करदर्पणायितम्॥ 19
तद्दृष्ट मात्रेण सहर्षजाश्रुभिः
प्रकीर्ण वक्त्रः प्रणिपत्य दंडवत्।
प्रमृज्य नेत्रे कृत मस्तकांजलि-
स्तत्यंत गीर्भि र्विविधाभि रस्तुत॥ 20
ततः प्रहृष्टो मुनिना सुपर्वणां
म यथोपदिष्टां शशिखंडनार्चनाम्।
कालत्रये तन्मणि कर्णिका प्लुत-

In Public domain. Digitization Muthulakshmi Research Academy

चकार तीव्रैर्नियमैः समन्वितः॥ 21

स भास्मनैः पुंड्र गणै र्यथाक्रमं

शिरो ललाटादिषु मंत्र पूर्वकम्।

सर्व प्रतीकेषु तथैव धामभी

रौद्राक्षिकैश्चैव बभौ मुनेः सुतः॥ 22

न वेद किंचिद्धृदयाब्ज विष्टरे

भवं भवानीकृत वाम पार्श्वकम्।

सुनील कंठं गज चर्म वाससं

सुधांशु मौलिं त्रिदृशां विना व्रती॥ 23

एवं सृजन्यंत मिमं हृदंबुजे

ध्यात्वा विनि -- सुधांशु मौलिकम्।

जिघृक्षुः शक्राद्दृषि सूनु मास्थितं

लुलाय मारुह्य यमः सपाशकृत॥ 24

ससैरिभे भैरव नाद घर्घरे

विभ्रांत मंभोद निभं भयानकम्।

यमं समुद्वीक्ष्य मृगंडु नंदनो

जगाद गीतिं प्रविहाय धैर्यतः॥ 25

रे रे कृतांत महत त्रिपुरामराते

In Public domain. Digitization Muthulakshmi Research Academy

काल कुसमहृण विध्ये नं समीपमेहि।
दूरे प्रयाहि शिवमन्त्रयमो पराङ्मो
ग्रीष्मे यथा कुसरितः सहसा स नश्येत॥ 26
नाहं कदाचिदपि दैवत सार्वभौमं
चंद्रार्ध शेखर ममुं जगता मधीशम्।
नाभ्यर्च्य किंचन भुनज्मि वदामि यामि
रेरे यम स्वपिमि किंचन मे व्रतं तत्॥ 27
(5) भक्तेषु खंड परशोः समवर्तिताल्यैः
कार्या कदाचन परेत विभो त्वयाद्य।
यस्मात्पितामह मिमे पितरं च तस्य
स्वस्वामि नोऽमहि मृत्युं तेन यंति मृत्यो॥ 28
यस्याज्ञया जगादिदं परिवर्तते हि
स्वे स्वे पदे स्थित ... समार कृशसमीरसिंह
12 B तत्त्वादृशस्य महतः परमेश्वरस्य
पादांबुजं कलयतां यम नापराध्ये:॥ 29
जानासि किं शमन जालम पुरा जगंति
(म) दंदह्यमान नलाकुल कालकूटम्।
क्ष्वेलं निपीय भयाबहुलं व्यातपूर्वान्

In Public domain. Digitization Muthulakshmi Research Academy

देवान् जुगोप तरसा गिरिशास्त्रिनेत्रः॥ 30
त्वं मृत्युरस्य जगतस्तव मृत्युमेनं
जानीहि मेरुधनुषं त्रिपुरामरातिम्।
यद्यस्य नाम्ना जनदास जनेषु जाड्यात्
कुर्यास्त्वमीव दपराध्यमवश्यमेव॥ 31
मामा कुरुष्व मयि साहसमद्य मृत्यो
श्रीकंठमर्चयितुमुद्यतमानचित्ते।
कुर्यास्तथा यदि कृतांत कृतांत एव
स्यास्तेन फालनयनेन जवेन सत्यम्॥ 32
देवं समर्च्य शशिखंड कृतावतंसं
पश्चात् ब्रवाव यदि कार्यमुभावथावाम्।
तावत् कुमार करवे बहिरास्व तूष्णीं
यो राजचूडमयते क्षुरिकास्य लेढि॥ 33
रुष्टो यदि त्रिजगतां प्रभुरेष मृत्यो
भस्मासयेदवनिमंडलमंतरिक्षम्।
संचूर्णयेत्कुलगिरीनपि सप्त सिंधून्
कुर्याद्विशोषितजलान्मदनस्य हंता॥ 34
तस्यान्नितोह मनलात्म मुनि प्रवर्यै -

In Public domain. Digitization Muthulakshmi Research Academy

संचिंत्य पादकमलस्य सुधांशुमौलेः।
त्वं नेशिषे शमन किंचिदुदीक्षितुं च
मां देवदेव चरणांबुज चंचरीकम् ॥ 35
निस्साध्वसं वचनमस्य मृकण्डुसूनो-
राकर्ण्य भीषणमुखो भ्रुकुटीविकारैः
शब्दापयन्निव दिशः प्रदिशश्च सर्वा
निर्घात निस्स्वन वचास्समुवाच सौरिः॥ 36
राणं समेति रत्न चक्रमपेहि दूरे
लोके यथार्भक वचस्तदिदं वचस्ते।
किं ते शिवार्चन विधौ न समीपयाने
योग्यत्व मास्ति मम बाल तया ब्रवीषि॥ 37
बाल्यान्न जानासि पराक्रमं तु मे
सर्वान्तकत्वादि कृतान्त नामता।
१२ A ख्याता ततो मे पुरतः कुतः शिवः
कुतो रथांगी कुत एव धाता॥ 38
---- मध्यजिक मासितुमेव नेष्टे
मद्घोरपाश विनिबद्ध गले कफार्तेः।
हा पुत्र हा गृहिणि हा मम बान्धवेति

In Public domain. Digitization Muthulakshmi Research Academy

क्रुशयंत मेन मवशां स्ववशां करोमि ॥ 39

पराक्रमं पश्य ममाद्य दुर्मते

त्वां लिंगपूजा बलगर्विणं भृशम्।

आकृष्य पाशादधुना प्रसारिता-

न्ये क्षणेनाहमितो महालयम् ॥ 40

इति प्रवल्गन् भ्रुकुटि प्रभीषणो

लुलाय माताड्य विचालितांघ्रिणा।

प्रसार्य पाश मुपाश्रितेश्वरे

मृगंडु सूनावथ निर्घृणो यमः॥ 41

संवेष्टितः क्रूरतरेण मेखली

पाशेन कालेन विसारितेन सः।

लिंगं समाश्लिष्य सुमत्वरं भया-

च्चुक्रोश शंभो प्रणतार्तिहन्निति ॥ 42

तल्लिंग मूर्धा भगवान् गिरीशः

प्रालेय शैलाकृति रप्रमेयः।

उद्भूय वामांघ्रि हते निपात्य

जघान शूलेन स मृत्युमुग्रम् ॥ 43

ततः कुमारो समपास्त साध्वसः

In Public domain. Digitization Muthulakshmi Research Academy

समीक्ष्य कालं विनिपातितं क्षितौ ।
तमस्तवीदिंदु कलावतंसिनं
चन्द्रावदातं प्रणिपत्य विस्मितः॥ 44

वंदे शशांक कलया कलितोत्तमागं
वंदे सनंदन मुखार्चित पादपद्मम् ।
वंदे नत वृजिन जात मपोहयंतं
वंदे धरेंद्र सुतयाश्रित वामभागम्॥ 45

दृष्ट्वा त्वदंघ्रि युगलं विधिदुर्विभाव्यं
शंभो भवाख्य जलधेरतिदुस्तरस्य ।
संतारणं शमन शामक माश्रितानां
संतान शाखि निगमांत वचो विभास्यम्॥ 46

इति स्तुवानं व्रतिनां वरिष्ठं समीक्ष्य शर्वः करुणाकटाक्षैः
किमीप्सितं ते वृणु वत्स तुष्टो ददामि ते साधु समर्हणेन॥ 47

इति ब्रुवाणं प्रणिपत्य शंकरं मृकंडु योगींद्र सुतः प्रहृष्टः ।
अयाचत मन्यमितायुषां जनाणं सुदुर्लभं पूर्विकबेधसामपि॥ 48

तद्भक्त धौर्यस्य मृकंडु सूनो -
राकर्ण्य वाचं शितिकंठ कंठः ।
त्वं षोडशायुर्भव नित्य मेव -

In Public domain. Digitization Muthulakshmi Research Academy

त्युक्त्वा स्वलिंगेंतर ध्यत्त शंभुः ॥ 49

अवाकिरन् देवगणाः समंतात्

कल्पद्रुमाणां सुमनः कदंबम् ।

जगुः कलं तुम्बुरु नारदाद्याः

नाट्यं वितेने प्सरसां संघः ॥ 50

एवं स्वभक्ताय मृगंडु सूनवे

दत्वा चिरायुर्गण मिंदु भूषणः ।

पुनर्निलिल्ये निजलिंग मूर्तौ

यमं समुज्जीम गिरा सुराणाम् ॥ 51

मृगंडु पुत्रोपि स चन्द्र मौले

दीर्घायुरभ्येत्य तदर्हणेन ।

गन्धर्व सिद्धैरपि चारणैश्च

सभाजितो हृष्टमनाः प्रतस्थे ॥ 52

ततः श्वेतारण्या दखिल सुरसेव्या दृषिसुतो

भृशं शोकाक्रान्तौ सुत विरहतः स्वस्य पितरौ ।

चिकीर्षुः सन्तुष्टौ स्थलमभिसमेत्या श्रिविपिनं

ववंदे साष्टांगं निजपितृ पदांभोज युगलम् ॥ 53

तं वंदमानं पितरौ सुहर्षिता-

In Public domain. Digitization Muthulakshmi Research Academy

बुत्थाप्य दोर्भ्यां परिरभ्य सादरम् ।
अंके समारोप्य विलोक्य पुत्रं
पूर्वोत्थतापं जहतुश्च सत्वरम् ॥ 54

सूत ॥ मुनिर्मार्कण्डेयस्त्रिपुरमथना राधन बला-
चिरायुः संप्राप्य प्रलयनिचयान् पश्यति बहून् ।
मृगंडुस्तं लब्ध्वा गृहविहित धर्मानविकलं
स कृत्वा संतुष्टस्तदनु विपिने निर्वृतिमगात् ॥ 55
इमां मृगंडोस्तनयस्य सत्कथां
यः श्रद्धधानः शृणुयात्पठेच्च वा ।
नास्यापमृत्युर्भविता कदाचन
ध्रुवं स्युरारोग्य तनूज संपदः ॥ 56

इति स्कान्दे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये अष्टमोऽध्यायः ॥

॥ ॥ ॥ ॥ ओम् ॥ ॥ ॥ ॥ ॥

१४ A ॥ ओम् ॥

~~ब्रह्मा स्वलोक पर्यंतं अन्विष्यान्विष्य चोपरि ।~~
सौते सर्व पुराणज्ञ ब्रह्मणो नृत भाषणम् ॥
कथमासीत्ततः शापं क्रोधात्तापं स भूजते ।

In Public domain. Digitization Muthulakshmi Research Academy

सविस्तरमिदं ब्रूहि श्रोतुमिच्छामहे वयम् ॥ 2

सूत: ॥ पुरा नाभिसरोजाद्धि हरेरंभोधिशायिन:।

हिरण्यगर्भ: संजातो जन्मस्थानमलोकत ॥ 3

दृष्ट्वा पद्मं महानालं नालमूलं समीक्षितुम्।

तस्यांत: प्रविवेशासौ दिव्यवर्षशतं विधि:॥ 4

अजोप्य: प्रविशन्नालं गाढान्धतमसावृतम्।

न ददर्श च तन्मूलं स तुन्नो नालकंटकै:॥ 5

पुनर्नालात्समुत्तीर्णो दिव्यवर्षशतं स वै।

कथं कथंचिन्निर्गत्य यथास्थानमविंदत ॥ 6

जलोत्तुंगतरंगेण ताडितं वातचालितम्।

पद्ममाश्लिष्य बाहुभ्यामशेदीत्साध्वसान्वित:॥ 7

ततो नारायणो देवो मत्स्यरूपमवास्थित:।

ओमिति व्याजहारास्मै तोये कुर्वन्प्रदक्षिणम् ॥ 8

तमेव ध्यायतस्तस्य पद्मयोने महात्मन:।

प्रसहु: ऋचय: सर्वास्सांगोपांगसमन्विता:॥ 9

तत: ससर्ज जगती: श्रुत्सर्वाननु चिन्तयन्।

चराचरमिदं सृष्ट्वा ब्रह्मा लोकपितामह:॥ 10

तमोगुणमधिष्ठाय शिवमायाविमोहित:।

अहमेव जगत्कर्ता मय्येवेदं जगत् स्थितम् ॥ 11
मत्समश्चाधिकश्चापि नास्ति सर्वत्र सर्वदा ।
अहमेव समाराध्यः सर्वदा सर्वजन्तुभिः ॥ 12
देवाः प्रजा मया सृष्टा लोकानामहमीश्वरः ।
इति गर्वं प्रपेदेऽसौ लोकस्रष्टैव दुर्मदः ॥ 13
ततः कदाचित् पद्माक्षः पद्मयोनेरदृश्यत ।
को भवानिति तं प्राह को भवानिति तं हरिः ॥ 14
सावलेपमिदं प्राह ब्रह्मा तन्नलिनेक्षणम् ।
अहं पतिः प्रजानां हि लोकानामहमीश्वरः ॥ 15
इति तद्वचनं श्रुत्वा प्रत्युवाच हरिर्विधिम् ।
कोपसंरक्तनयनो ब्रह्माणं पुरतः स्थितम् ॥ 16
जगतामहमेवेशस्तथापि प्रभवोऽप्यहम् ।
प्रणवस्योपदेष्टा ते यत्र वेदाः प्रतिष्ठिताः ॥ 17
तदर्थज्ञानशक्त्या ते लोकसृष्टौ प्रवर्तनम् ।
अस्पष्ट(.)
अ — घोषातामन्योन्यमेवं तौ हरिवेधसौ ॥ 18
देवदानवगन्धर्वाः पिशाचपतगोरगाः ।
संतप्तहृदयास्तस्थुः स्पर्धमानावुपेत्य तौ ॥ 19
एतस्मिन्नन्तरे शंभुर्भगवान् फाललोचनः ।

In Public domain. Digitization Muthulakshmi Research Academy

ज्योतिर्लिंग स्वरूपेण स्वमावृत्य व्यतिष्ठत ॥ 20

ज्योतिष्प्रपूरै र्लिंगस्य आप्त मेत च्चराचरम् ।

आद्यंत रहित स्तत्त तयोर्दृष्टु महं कृतिम ॥ 21

तं दृष्ट्वा महदाश्चर्यं ज्योतिर्लिंगं महत्तमम् ।

तस्थतु र्विगत स्पर्धौ हृदये साध्वसान्वितौ ॥ 22

पुनः स एव कालाक्षत टस्थो वृद्धरूपभृत् ।

ब्रह्माविष्णू समालोक्य वचनं चेद मब्रवीत् ॥ 23

स्पर्धेथे किं युवामत्र मद्वाक्यं श्रूयतामिह ।

दृश्यते हि पुरो लिंगं ज्योतिरूपं महत्तमम् ॥ 24

मार्गेथा मूल मेतस्य शिरश्चास्य महत्तमम् ।

यो द्रक्ष्यति स चेशानो मूल मस्य शिरोथवा ॥ 25

इति तद्वचनं श्रुत्वा मध्ये सर्वदिवौकसाम ।

वाराहं रूपमास्थाय विष्णुः पाताल माविशत् ॥ 26

हंस रूपं समास्थाय ब्रह्मा लोक पितामहः ।

समुत्पपात पक्षाभ्यां धुन्वंश्च नभसः स्थलम् ॥ 27

अथ विष्णु र्महीं भिंदन् दंष्ट्राभ्यां किटि रूपभृत् ।

आपातालमपि प्रेत्य तन्मूलं न च दृष्टवान् ॥ 28

ततः खिन्नः पुनः प्रेत्य तटस्थामिद मब्रवीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

नाहं ज्ञातोऽस्मि भो देव संद्रष्टुं मूलमस्य हि ॥ 29

विचिन्त्य सर्वं यत्नेन पुनः खिन्न इहागतः ।

इत्युक्त्वा पुंडरीकाक्षस्तूष्णीं तस्थौ नतानन ॥ 30

इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्र

खंडे आम्रवण माहात्म्ये नवमोऽध्यायः ॥९॥

[illegible]

सूतः ॥ ब्रह्मा स्वलोकपर्यंतमन्विष्यान्विष्य चोपरि ।

15 A ग्लानपक्षस्ततश्चिंतामगमत् खिन्नमानसः ॥ 1

नाद्राक्षमहमेतस्य लिंगस्यांतं कथंचन ।

क्रियान्युपरि वास्यांतो न मे गंतुं च शक्यते ॥ 2

इति चिन्तयतस्तस्य केतकी कुसुमं पतत् । त्

ज्योतिर्लिंग शिरो भ्रष्टं पुरस्तात्तस्य दृश्यत ॥ 3

तद्दृष्ट्वा कुसुमं ब्रह्मा कस्मात्त्वं केतकी सुम ।

आगच्छसीति पप्रच्छ प्रतिवाक्यं तदब्रवीत् ॥ 4

ज्योतिर्लिंग शिरो देशात् पततो मे चतुर्मुख ।

आसन् सुबहवः कल्पा न दृष्टाद्यापि मेदिनी ॥ 5

इति तद्वच आकर्ण्य केतकीं विधिरब्रवीत् ।

केतकी सुम साचिव्यं त्वया कर्तव्यमद्य मे ॥ 6

In Public domain. Digitization Muthulakshmi Research Academy

विष्णोश्च मम च स्पर्धा महती समजायत।
त्रयाणामपि लोकानां त्वमहं प्रभुरित्यतः॥ 7
एतस्मिन्नंतरे लिंगं समुत्थितमिदं महत्।
ततस्तत्स्थो देवेषु स्पर्धमाना ववोचतम्॥ 8
आद्यंतौ यो विजानीते लिंगस्यास्य स एव हि।
त्रयाणामपि लोकानां प्रभुर्भवति नान्यथा॥ 9
इति तद्वचसा हंसो भूत्वा ह्यवि यदाप तम्।
नचाहं दृष्टवान् किंचिल्लिंगस्यांतं कथंचन॥ 10
अद्राक्षमिति लिंगस्य शिरो देवान्वदाम्यहम्॥
त्वयापि ब्रह्मणा दृष्टमिति वाच्य मवश्यतः॥ 11
ततोहं प्रभुरेव स्यां समस्त जगतामपि।
श्रुत्वा त्वा विधिरेतेन कुसुमेन समागतः॥ 12
भो तत्स्थ मया दृष्टं लिंगस्यास्य शिरो महत्।
केतकी कुसुमेनापि तत्रैवेत्यनुमोदितम्॥ 13
अहमेव जगत्स्वामी नान्योस्तीति पितामहः।
स्थितवानुक्त स्तत्र स्थितो हरि रधो मुखः॥ 14
ततः कोपो महान् जातः शितिकंठस्य धूर्जटेः।
आविर्भूय महालिंगा दिदमाह महेश्वरः॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

अदृष्ट्वा तच्छिरो यस्मादनृतं त्वमवोचथाः।
दृष्टवानिति तद्ब्रह्मन् केतकी कूटसाक्षिकम्॥ 16
प्रणवार्थस्य विज्ञानाल्लोकस्रष्टृत्वमाप्तवान्।
१५ B तद्ध्यानं न भवे ब्रह्मन् यतो मिथ्या वचोऽब्रवीः॥ 17
इति शप्त्वा केतकीं च शशाप कोपसंयुतः।
यतः सुममिदं देवाः कूटसाक्षित्वमभ्यगात्॥ 18
तत्सर्वं मम पूजार्थं अग्राह्यं संभवेदिति।
अथ तच्छपथ्या ब्रह्मा सवेपथु रुदंजलिः।
समान देवतैः सार्धं तमेव शरणं ययौ॥ 19
प्राणिपत्य चिरं मूर्ध्ना वेध्या आनत कंधरः।
विमृज्याश्रूणि तुष्टाव महान्तं परमेश्वरम्॥ 20
क्षमस्व परमेश्वर त्रिदशकोटि कोटीरभा
प्रभाकर सदोन्मिषच्चरण चारु पंकेरुह॥
तमोगुण तमोमयीं धियमुपेयुषा हं जुषा
मया विहितम वै गिरिशमंतुमक्षत्तयेन॥ 21
त्वदंघ्रि सरसीरुहं श्रुतिगणै रजस्रोडितं
गतोस्मि शरणं विभो न च विनास्ति तेंघ्रिद्वयम्।
गतिर्मम दयानिधे मयि विजेहि सर्वेश्वर

In Public domain. Digitization Muthulakshmi Research Academy

त्वदीय करुणेक्षणावलि मुदार पद्मश्रियम्॥ 22

त्वं बोधरूपो निजधर्मवर्तिना-
मुपासितुं क्षेममयीं तनूमिमाम्।
बिभर्षि भूमन् तव विश्वमंगलं
वपुर्ममाक्ष्णामपि गोचरण्यभूत्॥ 23

कृतार्थ एवाह मपार संस्मृतिं
तरंति केचित्कृत पुण्य संचयाः।
यत् भक्तिपोतेन त्वदंघ्रि पंकजं
न विष्णुनाद्राक्षि मयाद्य दृश्यते॥ 24

चतुर्भिरेवं वदनैः स्तुवानं
पर्यश्रुपूर्णैर्वनजा दुदीर्णम्।
प्रशांत रुट् फाल विलोचनस्तं
जगाद देवैरपि सेव्यमानः॥ 25

इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्रखंडे
अग्न्यावरण माहात्म्ये दशमोध्यायः॥ ५॥ ५॥

श्री

शिवः॥ ब्रह्मन् क्षितितले स्थानं मम प्रीतिकरं सदा।
वर्तते तत्र गत्वा मां समर्च्य तपोन्वितः॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्र ते सुप्रसन्नोऽहं शापात्त्वां विमोचय च।
पारमेष्ठ्यं च दास्येऽथ यथावत्सकलं महत्॥ 2
तच्च स्थानं प्रवक्ष्यामि भूतले शृणु कंजभूः।
दक्षिणे दंडकारण्ये कावेर्याश्चोत्तरे तटे॥ 3
प्रत्यक् जप्येश्वरात् किंचित् वायुकोणे द्वियोजने।
महदाम्रवणं नाम पुण्यपक्षिमृगैर्युतम्॥ 4
अस्ति तापससंजुष्टं सर्वर्तुकुसुमैर्युतम्।
तत्राहं लिंगरूपेण वर्ते प्रीतः स्वयंभुवा॥ 5
शुद्धरत्नं कृतयुगे त्रेतायां मरकतात्मकम्।
द्वापरे स्फाटिकं रूपं कलौ रुद्राक्षसंनिभम्॥ 6
लिंगे तत्र तत्र सांनिध्यं कुर्वन् तिष्ठामि संततम्।
यो (वा) सकृत् भजति मां तत्र लिंगस्वरूपिणम्॥ 7
सर्वपापविनिर्मुक्तो गाणापत्यमुपेष्यति।
यं वा कामयते ~~तस्मै~~ कामं तस्मै तं प्रददाम्यहम्॥ 8
न च काश्यां न केदारे तादृशी प्रीतिरस्ति मे।
यादृश्याम्रवणे नित्यं सद्योजातत्ववर्तिनि॥ 9
अतस्तत्र विरिंच त्वं विजिकोटिसुपूजितम्।
तपसाराध्य क्षिप्रं सर्वं संपत्स्यते तव॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

वेधास्तच्च आकर्ण्य चन्द्रमौलेः पुरद्विषः।
लज्जयावनतो भूत्वा प्रणिपत्य महेश्वरम्॥ 11
ततो जन महर्लोकान् समतीत्य प्रजापतिः।
जम्बूद्वीपे महापुण्ये दंडकाविपिनं महत्॥ 12
संप्राप्य सह्यजातीरं मुनिवर्यैर्निषेवितम्।
दृष्ट्वा परमसंहृष्टस्तत आम्रवणं शुभम्॥ 13
प्रपेदे वालखिल्याद्यैर्वैश्वानरसमप्रभैः।
अम्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा॥ 14
(2) उत्तानशयनैः कैश्चित् तथार्द्रपटसंयुतैः।
प्राणायामपरैर्नित्यं शिवनामपरायणैः॥ 15
वैतानवह्नौ जुह्वद्भिः पशुमेध्यो घृतोदनैः।
पावनं शिवमाहात्म्यं बोधयद्भिः परस्परम्॥ 16
संकीर्णं सर्वतोभद्रं मृगयूथैर्निषेवितम्।
B
सरोभिः शीतलं नित्यं कैलासमिव शोभनम्॥ 17
तत्क्षेत्रप्राप्तिमात्रेण निरानंदस्य वेधसः।
सानंदमभवच्चेतः शुचं च विजहौ विधिः॥ 18
तत्रत्यमुनिवर्यैश्च प्रत्युद्गम्य कृतार्हणः।
ततस्तत्रत्य सरसि विशुद्धतरपाथसि॥ 19

In Public domain. Digitization Muthulakshmi Research Academy

अथ गाह्म सुसंतुष्टः कृतकर्मा सरोजभूः ॥
धृतक्षौमांबरः शुद्धो भस्म क्लृप्त त्रिपुंड्रकः ॥ 20
अलंकृतश्च रुद्राक्षै मुक्ताविद्रुम संयुतैः ।
रत्नेश्वरं महालिंगं दृष्ट्वा रोमांच विग्रहः ॥ 21
ननाम दंडवद्भूमौ आनंदाश्रु परिप्लुतः ।
शिरस्यंजलि माधाय तुष्टाव परमेश्वरम् ॥ 22

वरं वरेण्यं वरदं पुराणं
निजप्रभा द्योतित सर्वलोकम् ।
कामादि देवं त्रिपुरघ्न मीशं
प्रणौमि मूर्ध्ना श्रवणे विभांतम् ॥ 23

अतात्मा मूले जगदेक मूलं
त्वं प्रादुरासी ज्जगतां हिताय ।
त्वां लिंगमूर्तिं भजतोहि जन्तून्
यथाब्धि मापः प्रविशंति कामाः ॥ 24

नमो नमस्ते जगदेक कर्त्रे
नमो नमस्ते जगदेक भर्त्रे ।
नमो नमस्ते जगदेक हर्त्रे
नमो नमस्ते त्रिपुरां प्रहर्त्रे ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

इति स्तुत्वा महादेवं उमया सहितं विधिः।
कृत्वा च तस्मै देवाय वरिवस्यां समाहितः॥ 26
तस्यैव मैश्वरं रूपं खंड चंद्रावतंसकम्।
तमाल श्यामल गलं स्फुरत्फाल विलोचनम्॥ 27
स्फुरद्वामार्ध नारीकं भूषायित भुजंगमम्।
गंगा तुंग तरंगौघैस्सदा धौत जटाधरम्॥ 28
गजाजिनोत्तरासंगं बिभ्रता जगवा युजम्।
हृदब्ज विष्टरे ध्यात्वा तपश्चक्रे सुनिश्चलम्॥ 29
क्रमेण संविदाकारस्तस्थौ किंचिन्न वेदसः।
एवं संतप्यतस्तस्य तस्मिन् ब्राह्मणे विजेः॥ 30
दिव्य वर्ष सहस्राणि अतीतानि द्विजोत्तमाः।
अथ तत्तपसा तुष्टो देवदेवो वृषध्वजः॥ 31
रुद्ध रत्नेश्वराल्लिंगात् प्रादुर्भूतो दयानिधिः।
शरदभ्र घनाकारः प्रफुल्ल वदनांबुजः। 32
आकाशे जय जयेत्युच्चै र्जगु र्गंधर्व किन्नराः।
दिव्या महर्षयस्तत्र हस्त ताल समन्विताः॥ 33
एक पादं समुद्धृत्य चलद्रुद्राक्ष मालिकाः।
विचित्र नटनं चक्रु शनैंदाश्रु परिप्लुताः॥ 34

In Public domain: Digitization Muthulakshmi Research Academy

देव दुन्दुभयो नेदु र्ननृतुश्चाप्सरो गणाः।
ववर्षुः पुष्प वर्षाणि विचित्राणि समंततः॥ 35
तमाप्यथ सुमंतुष्ट स्तुष्टाव गिरिजा सखम्।
सगद्गद गिरा युक्तः प्रणिपत्य पदे पदे॥ 36
त्वां नौमि शर्वं गर नील कंठं
त्रिणेत्र मर्धांग निजावरोधम्।
जटातटे शीत रुचा विभांतं
शांतं कृतान्तान्तक मार्य मीशम्॥ 37
लौकैक कर्तृत्व मदाप्लुतस्य
कृतागसस्ते मम मेरुधन्वन्॥
क्षंतुं प्रभो चार्हसि बुद्धिरेषा
मैवं पुन र्भूत्त्वदनुग्रहेण॥ 38
अथैनं भगवान् शर्वः दया तरलितेक्षणैः।
आनंदयन् सुधा वाचं बभाषे परमेष्ठिनम्॥ 39
पारमेष्ठ्यं यथावत्ते दत्तमद्य प्रजापते।
प्रणवार्थस्य विज्ञानं यथावत्प्राति भातु ते॥ 40
इति ब्रुवति देवेशे चंद्र मौलौ महेश्वरे।
सर्व वेदार्थ विज्ञानं यथा पूर्व मभू द्विधेः॥

In Public domain. Digitization Muthulakshmi Research Academy

जगन्मंगल भूयिष्ठं ब्रह्मण्यानंद मेयुषि।
तत आनंद भरितो ब्रह्मा शिव पदाम्बुजम् ॥ 42
चतुर्भि मकुटैः स्पृष्ट्वा जगादेदं वचः शुभम्।
भगवन् देवदेवेश क्षेत्र मेत जगत्त्रये ॥ 43
ब्रह्मानंदमिति ख्यातं सर्व पाप निबर्हणम्।
भवे ब्राह्म वर्णोपेतं तीर्थं च ब्रह्म नामकम् ॥ 44
अत्र स्नात्वा सकृद्धोवा ब्रह्महा गुरुतल्पगः।
स्वर्णस्तेयी सुरापीव लिंग मेतन्म मे - दि ॥ 45
विमुक्तः सर्व पापेभ्यस्तव सायुज्य माप्नुयात्।
16 B पितॄनुद्दिश्य यच्छ्राद्धं कुरुते त्र समाहितः ॥ 46
अक्षय्य वट मूले तु गयायां तत्कृतं भवेत्।
यत्किंचि कुरुते दानं यथाशक्ति द्विजन्मने ॥ 47
अनंत फल मभ्येत्य तल्लोके स महीयताम्।
एकं यः श्रोत्रियं विप्रं गृहोपकरणैः सह ॥ 48
वर्षाशनेन संयुक्तं क्षेत्रे स्मिन् स्थापयेत् सतु ॥
कोटि लिंग प्रतिष्ठातुः फलभाक् भवतु प्रभो ॥ 49
इति त्वार्थितं सर्वं दत्वा चंद्रार्धशेखरः ॥
स्तूयमानः सुरगणैः लिंगे तस्मिन् तिरोदधे ॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

वेद्यास्समस्तागम योनिभूतं
यथा वदेत्स प्रणवं महेश्वरात् ।
उपस्थिताभि महित स्त्रयीभि:
हंसाधिरूढः स्वपदं प्रपेदे ॥ 57

प्रजापतेः शापविमोचनं यः
शृणोति मुक्तः स च पातकेभ्यः ।
समस्त कामान् लभते च नित्यं
सुपुत्र पौत्रैः सह मोदमानः ॥ 58

इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये एका-
दशो ध्यायः ॥ ॥ ॥ ॥

ऋषयः॥ अहल्यायां मनुष्यायां कथमिंद्रो मुमोह सः।
अप्सरोभिः सदा सेव्यो नंदने स्वर्नदी तटे॥
विचिकित्सामिमां छिंधि सूत सर्व विदां वर।
सूतः॥ ऋषयोऽप्युग्र तपसः कंद मूल फलाशनाः॥ 1
दैवेनोपहता स्तेपि गृह्यंते काम मन्युभिः॥
ब्रह्मा तिलोत्तमां दृष्ट्वा मुमोह स्वसुतां प्रति॥ 2
वल्मीक भूतश्च्यवनो जीर्णांगस्तपसि स्थितः॥ 3
शर्याति तनयां दृष्ट्वा कंदर्प वशमेयिवान्।
संसेव बहवो लोके कालो हि दुरतिक्रमः॥ 4
पुरा खलु शुनासीरः क्षिति गोल दिदृक्षया।
वारिवाह पथं प्राप्य अचरन्मेघ वाहनः॥ 5
एतस्मिन्नंतरे भूमौ संतप्तौ सूर्य रश्मिभिः।
प्राजना ताड्यमानौ च कर्षकेण पदे पदे॥ 6
सीरेण महता बध्वा कर्षंतौ कठिन स्थलीम्।
उक्षाणौ सुरभिर्दृष्ट्वा शुशोच भृश दुःखिता॥ 7
अश्रुस्ताद्व्रजतो गाते देवराजस्य तस्य वै।
शीतोष्णाः पतिता वेगात् सुरभेरश्रु बिन्दवः॥ 8

In Public domain. Digitization Muthulakshmi Research Academy

अन्वायं देवराजश्च सुरभिं व्योम्नि विष्ठिताम्।
पर्यश्रुनयनां दीनां वेपमानां विलोक्य ताम्॥ 9
साध्वसेनाभिसंयुक्तो विन्नांकी चात्मनो शुभम्।
पप्रच्छ सुरभिं देवीं समस्तानां गवां प्रसूम्॥ 10
मातः किमर्थं सुरभे त्रिलोकाधिपतौ मयि।
रोदिषि त्वमिह स्थिता नचांहो स्मासु विद्यते॥ 11
इति ब्रुवाणं तं शक्रं अवलेप समन्वितम्।
सुरभिः प्राह सा क्रोधाद् दुःखेन च समन्विता॥ 12
किं शक्र चक्षुषोस्त्वेवं तप्यमानौ सुतौ मम।
सूर्यरश्मि भरवंतन्न भूमौ विषयी कृतौ॥ 13
आत्मैव पुत्रतां प्राप न सुताद्विद्यते परम्।
ममापत्यं हि गोमातं येन व्याप्तमिदं जगत्॥ 14
सर्वे त्वदंशसंभूता राजानो विबुधाधिप।
भूतलेषु हि सर्वत्र न विना त्वां महीक्षितः॥ 15
तुर्यांशेन त्वमेव क्ष्मां गोपायसि तदात्मना।
नयनाभ्यां प्रसुप्तोऽपि जागर्ति नयचक्षुषा॥ 16
अत एव हि कथ्यंते राजानो दीर्घ चक्षुषः।
क्रमवृत्ता न जानंति राज्यं न्यायेन चक्षुषा॥ 17

In Public domain. Digitization Muthulakshmi Research Academy

त्रैलोक्याधिपतित्वेन दुर्मदोऽसि शचीपते।
कामेनाश्लिष्टचित्तस्त्वं अतो भव सुराधिप॥ 18
इति शप्त्वा ययौ देवी सुरभिर्लोकपूजिता।
तत आखंडलस्तत्र तमसाविष्टमानसः॥ 19
वर्षयित्वा पयोदेन मोचयित्वा च गोद्वयम्।
अद्राक्षीद्विचरंस्तत्र भूतले गौतमाश्रमम्॥ 20
नानानोकहसंजुष्टं पुण्यपक्षिमृगावृतम्।
होमधूमेन संव्याप्तं सुरभीकृतदिक्तटम्॥ 21
तदाश्रमाद्विनिर्यातां चंद्रलेखामिवांबुदात्।
सोत्फुल्लमल्लिकादामकुसुमान्वितलक्षणाम्॥ 22
समुन्नतकुचद्वंद्वां शाकचंद्रनिभाननाम्।
(द्वी) पीनश्रोणीभराक्रांतमंदभूतगतागताम्॥ 23
लावण्यामृतपाथोधिनिमग्नतनुवल्लरीम्।
शुकतुंडनखीं श्यामां तप्तहाटकसंनिभाम्॥ 24
नयनौ द्वीवरद्वंद्वां निस्सरत्स्मरमार्गणाम्।
(वी) कदलीवरकांडोरुं चमूरुजिनसंवृताम्॥ 25
धूमरेखाभिसंरुद्धां स्फुरदग्निशिखामिव।
स्मृत्वं नामहल्याख्यां गौतमस्य वरांगनाम्॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

विलोक्य निर्निमेषत्व ममं त्वा त्मनि सार्थकम्।
स्मर बाण विनिर्भिन्न स्ततोयं पाकशासन :॥ 27
एतादृशी न गंधर्वी नाप्सरा नच किंनरी।
स्वर्लोके हि मया दृष्टा नागकन्याप्यथ: स्थले॥ 28
इयं यस्य वरारोहा शयनं याति सस्पृहम्।
तस्यैव जन्म सफलं स पुण्य गण भागपि॥ 29
इत्थं हरि हयस्यास्य देवराजस्य दु:सह:।
संप्रमथ्येंद्रिय ग्रामं प्रादुरासीन्मनो भव:॥ 30
अथ तत्संगमोपायं विचिंत्य च पुन:पुन:।
तत्रैव तिष्ठन्नेकांते निशीथे गौतमं मुनिम्॥ 31
विनिर्गमयितु शक्रो ध्वांक्षति स्म स काकवत्।
ततो वल्कल मादाय गौतम स्तापसाग्रणी:॥ 32
उष: काल इति स्नातुं नदी तीर मपद्यत।
एतस्मिन्नंतरे जिष्णु र्मुनि वेष समन्वित:॥ 33
अहल्यामाह सुश्रोणि कंदर्प शरपीडित:।
त्वया संगम मिच्छामि हे सुभ्रू वरवर्णिनि॥ 34
ऋतु कालं प्रतीक्षंते नच काम वशं गता:।
त्वदर्थे हि विशालाक्षि मामयं निशितै: शरै:॥ 35

काम: कमलपत्राक्षे प्रतिविध्य न शाम्यति।
मां त्वं पीनायतश्रोणि संजीवयितुमर्हसि॥ 36
त्वदधीना मम प्राणास्तव भृत्यतरोऽस्म्यहम्।
यदि मे संति नेत्राणि सहस्राणि शुभानने॥ 37
त्वदंग सौष्ठवं द्रष्टुं तदा शक्नोमि शोभने।
हल्यं नाम हि वैकल्यं अहल्यासि यतस्तव॥ 38
वैकल्यं नास्ति सौंदर्ये पुष्कलं तद्धि वर्तते।
तां वाच मुशतीं श्रुत्वा ज्ञात्वेनंच पुरंदरम्॥ 39
मामा सुरेंद्र मधर्म कृत्यं
कृथा न धर्मो भवतोऽस्ति तोद्य।
ऋषिर्ममायं पतिरुग्रतेजा
कामं निगृण्हीष्व सहस्व धैर्यात्॥ 40
तथैवं प्रतिषिद्धोऽपि विवशो मदनार्दितः।
पर्यष्वजत तां गाढं समुन्नत पयोधराम्॥ 41
तद्गौरवादहल्यापि तद्दृष्टी कृतवत्यभूत्।
ततस्तामाह देवेशः कृतार्थेनान्तरात्मना॥ 42
सुप्रीतोऽस्मि सुचार्वंगि गमिष्यामि सुरालयम्।
सुखमास्वेह भद्रं ते मामनुज्ञातुमर्हसि॥ 43

In Public domain. Digitization Muthulakshmi Research Academy

इति ब्रुवाणं तं शक्रं प्रत्युवाच वरांगना ।
आत्मानं मांच रक्षस्व सर्वथा त्रिदशाधिप ॥ 44
गच्छ शीघ्रमितो देशान्मुनिः परमकोपनः ।
इति तद्वचनं श्रुत्वा शक्रस्तामनुमंत्र्य च ॥ 45
शंकितश्च मुनौ तस्मिन् निर्जगाम तदाश्रमात् ।
एतस्मिन्नंतरे सोपि ज्वलत्पावक संनिभः ॥ 46
तीर्थोदक परिक्लिन्नः प्रगृहीत समित्कुशः ।
गौतमो मुनिरद्राक्षीन्निर्गच्छंतं सुराधिपम् ॥ 47
स्ववेषेण समायुक्त मसत्पत्नमुपागतम् ।
तद्वृत्त मखिलं ज्ञात्वा भगवान् ज्ञान चक्षुषा ॥ 48
ततः शेपे महातेजाः क्रोधेन कलुषी कृतः ।
मम वेषं सुबिभ्राणो दुर्मते वासवाधुना ॥ 49
अकर्तव्यमिदं यस्मादकार्षीः काममोहितः ।
अफलस्त्वं भवेश्शीघ्रं किंच शापं ददामि ते ॥ 50
यदि मे संति नेत्राणि सहस्राणि शुभानने ।
त्वदंग सौष्ठवं द्रष्टुमिति तामब्रवीः किल ॥ 51
सहस्र योनि रूपाणि लोचनानि तथैव ते ।
संतु देवेश मिथ्यागीर्न ते भवितुमर्हति ॥ 52

In Public domain. Digitization Muthulakshmi Research Academy

अथ तच्छाप मात्रेण पेततु वृषणौ भुवि।

इंद्रो भवद्विरूपश्च सहस्र भग चिन्हितः।। 53

१९ B ज्ञात्वा वृत्रहणं देव मशासीत्स्ववधूमपि।

इह वर्ष सहस्राणि दुर्भगे त्वं शिला भव।। 54

यदा दाशरथी रामो वनमेतदुपैष्यति।

तत्पाद रजसा स्पृष्टा रजः पूता भविष्यसि।। 55

इति ज्ञात्वा तपः कर्तुं हिमवंतं ययौ मुनिः।

इति द्विजास्तस्य पुरंदरस्य

स प्राप्य महत् कश्मल मात्मदोषात्।

ततो महालिंग मुपास्य रुद्र-

रत्नेश्वरं नाम विशुध्यति स्म।। 56

।।इति स्कांद पुराणे अगस्त्य संहितायां

क्षेत्रखंडे आम्रवण माहात्म्ये द्वादशोऽध्यायः।।

x ——————— x

In Public domain. Digitization Muthulakshmi Research Academy

॥ त्रयोदशोऽध्यायः ॥

विचित्रमिदमाख्यानं श्रुत्वा तो मुनयः पुनः
पप्रच्छुरखिलाः सूतं नैमिशारण्यवासिनः ॥ 1
ऋषयः ॥ सूत नो ब्रूहि विस्तार्य कथमाः ञ्जवणेश्वरम् ।
उपास्त शक्रस्तच्छापात् कथं मुक्तश्च तत्स्थले ॥ 2
सूतः ॥ उर्वेन्द्रः सावहित्थोयं दैवतानिदमब्रवीत् ।
सर्वेषां नो हितार्थाय गौतमस्य तपस्विनः ॥ 3
तपोन्तरायं कुर्वेस्म देवास्तत्फलमीदृशम् ।
नाहं स्वार्थमिदं कृत्यं कृतवानस्मि सांप्रतम् ॥ 4
किं न मेप्सरसः संति रंतुं रूपोत्तमा दिवि ।
स्वर्गमाक्रमितुं यत्नं तपसाकृत गौतमः ॥ 5
अतस्तन्नियमं हंतुं क्रोध उत्पादितो मया ।
शापमोक्षेण महता तपोस्य विलयं गतः ॥ 6
ततो वैरूप्यमेतन्मे निबर्हयितु महत्व ।
तथा सुरगणाः सर्वे मुनिसंघाः सचारणाः ॥ 7
सुरकार्यकरं यूयं कुरु ध्वंसफलं च माम् ।
निर्लिप निकुरुंबास्ते श्रुत्वा गोत्रभिदो वचः ॥ 8
धिषणं प्राप्य तं नत्वा वचनं ते समब्रुवन् ॥

In Public domain. Digitization Muthulakshmi Research Academy

देवाः॥ गौतमस्य सतीं गत्वा देवराट् का - - - गुरो॥ 9
कुरूपं प्राप्तवानद्य वृषाग्निर्वृषणो ह्यभूत॥ 9
अस्मान् कुप्यति सेदानीं न ज्ञानीकार ईर्यताम्॥ 10
गुरुः॥ सुरभी कृत शापेन - - - - तमसावृतः।
कामवृत्ता न जानंति कृत्याकृत्यं विमोहिताः॥ 11
अहोद्य देवराजस्य महत्कश्मलमागतम्।
भवितव्यं भवत्येव नारिकेल फलांबुवत्॥ 12
गम्यमेव हि गंतव्यं गजभुक्त कपित्थ वत्।
तदुपायं प्रवक्ष्यामि येन शुध्ये च्छचीपतिः॥ 13
- - मेन कृत वैरूप्यं कामारिं फाललोचनम्।
आराध्य विनिहंतव्यं तपोभिः परमेश्वरम्॥ 14
हेत्वंतरमिदं चास्य शृणुतात सुरोत्तमाः।
काम वैरूप्य संप्राप्तौ गत्वा यूयं समाहिताः॥ 15
अगस्त्याध्युषितायां हि दिशि काचिन्महानदी।
मरुद्वृधेति विख्याता मरुद्भ्यालेन वर्धते॥ 16
सह्य भूधर संभूताप्यसत्यांहः प्रणाशिनी।
महर्षि गण संजुष्टा महाकृतैश्च मंडिता॥ 17
समुद्र गामिनी नित्यं मत्स्य कच्छप संयुता।

In Public domain. Digitization Muthulakshmi Research Academy

तस्याश्चैवोत्तरे तीरे गायत्री नाम निम्नगा।
वर्तते मज्जतां नृणां महापापौघ नाशिनी॥ 18
तदुत्तर तटे पुण्ये जंबूक्षेत्रस्य पूर्वतः।
किंचिदीशान दिग्भागे मृग संघ निषेवितम्॥ 19
रम्यमाम्रवणं नाम वर्तते शुभवत्तरम्।
शुद्धरत्नेश्वरं नाम महालिंगं सनातनम्॥ 20
ब्रह्मतीर्थं च तत्रास्ति मत्स्य तीर्थं च तद्विदुः।
तस्मिन्नाम्रवणे पुण्ये मृगंडुस्तपसां निधिः॥ 21
तपश्चक्रे महातेजा नियमेन समाहितः।
तं प्रधर्षयितुं शक्रः प्रेषयामास मन्मथम्॥ 22
स पुष्पमय बाणेन मुनिं विमाध्य निश्चलम्।
चलितं हृदयं बुध्वा मृगंडुर्ज्ञान चक्षुषा॥ 23
इंद्रेण प्रेषितः कामो अकरोन्मम मानसम्।
बाणेन अन्ययन्नद्य तस्मा द्व्याघ्रो भवेत्वयम्॥ 24
बलारिः प्रेषकश्चास्य कारयन्मम विक्रियाम्।
कामेन विक्रियां यातु तमोगुण समन्वितः॥ 25
यदा त्वत्र महालिंग मुपासिष्यति देवराट्।
तदा कामुकता प्राप्त वैरूप्यं तत्प्रहास्यति॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

काम श्चैतत्स्थलं प्राप्य निजरूपं समेष्यति।
इति तस्य च शापेन प्राप्तमेतच्छचीपते:॥ 27
अतस्तै क्षेत्र मभ्येत्य महालिंगं सनातनम्।
नियमै र्यद्युपासीत तत: शुद्धो भवेद्वृषा॥ 28
देवा:॥ कंदर्पो ब्याघ्रतां प्राप्य किं चकारच लब्धवान्।
वक्तुमर्हस्यशेषेण श्रोतुं कौतूहलं हि न:॥ 29
गुरु:॥ अथ काम: पुलिंदात्मा विचचार वने वने।
रुरून् किटीन् लुलायांश्च भल्लूकानपि मार्गणै:॥ 30
भिंदंश्च श्वपदान्नित्यं मुनिशापेन मोहित:।
अथ कालांतरे सोयं मृगतीर्थपुरं महत्॥ 31
मध्याह्न रवि संतप्त: प्राप्य तत्र शुभोदकम्।
ब्रह्मारण्यसरसस्तीरं गत्वा तत्र व्यतिष्ठत॥ 32
तत्र मत्स्याश्चरंतस्ते ब्रह्मतीर्थे सुशीतले।
पतनोत्पतनाभ्यां च लीलया चिक्षिपुर्जलम्॥ 33
अथ तत्सलिलार्द्रोयं मुक्तशाप: पुलिंदताम्।
विहाय प्राप्तवान् रूपं रतिनेत्र रसायनम्॥ 34
तदाप्रभृति तत्तीर्थं महत्तीर्थं विदुर्बुधा:॥
अतोऽयमपि वृत्रारिस्तत्रत्याम्र वणेश्वरम्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

पूजयित्वा यथावच्च भविष्यति न संशयः। ३५

सहस्रा सरसीरुहैः प्रतिदिनं च संवत्सरं
यदाम्रवण भूतले स्वयमुदीर्ण लिंगं महता।
समर्चतु गोत्रभिद्वपुषि तस्य यद्वै कृतं
सहस्र नलिनक्षणं सुरकदंब संभास्यति॥ ३६

इति निज गुरुवाक्यं भक्तियुक्ता निशम्य
स्व मकुट मणि भाभिस्तस्य पादाब्ज युग्मम्
अरुणित मति कृत्वा निर्निमेषाः पुनस्ते
त्रिदशपति मुपेयुर्मेरु कासार देशे॥ ३७

इति स्कान्द पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये त्रयोदशोऽध्यायः॥

In Public domain: Digitization Muthulakshmi Research Academy

॥चतुर्थोऽध्यायः॥

अस्तुवंत सरोभ्याशे देवतास्तत्र संगताः।
अहल्याजार वृत्तारे बलभेदिन् शत क्रतो॥ 1
दर्शयस्व स्वमात्मानं वयं त्वां द्रष्टुमागताः।
इति तुष्टः स जंभारि र्लज्जयावनताननः॥ 2
आकार गोपनं कृत्वा तेषां प्रत्यक्षतां गतः।
तमब्रुवन् सुराः सर्वे विषण्णं पाकशासनम्॥ 3
माविषीद शुनासीर शापप्राप्तं तवात्मनि।
वैरूप्य मिद मस्माभि रपनेतुं गुरोर्मुखात्।
सम्यक् दृष्ट उपायस्तं भवान् संश्रोतु मर्हति॥ 4
जम्बूद्वीपे महापुण्ये विंध्य पर्वत दक्षिणे।
मरुवृधापगा तीरे गायत्री सरितस्तटे॥ 5
मृगंडु कृत शापेन तवेदं समुपस्थितम्।
तन्मुने स्तपसो विघ्नं कर्तुकामेन विक्रियाम्॥ 6
त्वमुत्पादितवांस्तस्मिन् मृगंडौ हि महात्मनि।
सोऽशा ~~प्तवान्~~ पत्वां मुनिः किंचित् काम प्रस्कन्नमानसः॥ 7
न च स्वर्लोक संपत्त्यै तपस्यामीह किंचन।
अपवर्गमहं कुर्वे तप एतदनुत्तमम्॥ 8

In Public domain. Digitization Muthulakshmi Research Academy

व्यकारयत यच्छक्रस्तत्तादृशा मनागसम्।
अतः कामवशात्सोऽयं गच्छेद्वपुषि विक्रियाम्॥
यदा तामावणं प्राप्य महालिंगमिदं शुभम्।
अर्चयिष्यति मच्छापाद्विशुद्धिं समुपेष्यति॥
इति तच्छपनादद्य गत्वा तत्क्षेत्रमुत्तमम्।
तपसाराध्यमस्वाशु तल्लिंगं लोकपूजितम्॥
तत्प्रसादाद्विशुद्धस्त्वं भविष्यसि न संशयः।
कामश्च भाजतां प्राप्य मीनैः संताडितैर्जलैः।
शापाद्विमुक्तस्तत्रैव तदेतन्नो निदर्शनम्॥
न च संभ्राजते स्वर्गो देवराज त्वया विना।
छिद्राणि मृगयंते हि दनुजाः परिपंथिनः॥
त्वद्बाहुबलवीर्येण वयं स्वर्गे सुखं स्थिताः।
द्विषद्भ्यः शंकिता नित्यं वयं वर्तामहे दिवि॥
अतस्त्वं शीघ्रमभ्येत्य जंबूद्वीपे मरुद्वृधाम्।
समर्चयस्व हेशानं शुद्धरत्नेश्वराह्वयम्॥ 15
एकपादेन तिष्ठामस्त्वदागमनकांक्षिणः।
इति देवाः शचीनाथं प्रस्थाप्य महीतले।
पालयंतो दिवं तत्र तिष्ठंति स्म कथंचन॥ 16

In Public domain. Digitization Muthulakshmi Research Academy

उक्त तद्वचसा शक्रो विंध्य पर्वत दक्षिणे।
सह्याजा तट मभ्येत्य महर्षि गण सेवितम्॥ 17
पुण्यानोकह संजुष्टं पशु पक्षि मृगाकुलम्।
तदुत्तर तटे पुण्ये गायत्री सरिदुज्वले॥ 18
महदाम्रवणं प्राप्य ब्रह्मानंद पुरे शुभे।
कल्पयित्वा महत्तीर्थं स्वनामक मकल्मषम्॥ 19
तत्तीर्थे प्लवनं कृत्वा कृताह्निक विधि क्रमः।
शुद्ध भस्म लसत्पुंड्रः शिव चार्वक्ष मालिकः॥ 20
शुद्धरत्नेश्वरं लिंगं विप्रर्षि गण सेवितम्।
सहस्र पंकजैर्नित्यं पंचाक्षर परायणः॥ 21
अर्चयामास देवेशः कृत पाद्यादि सत्क्रियः।
धूप दीपैश्च संपूज्य निवेदित महोदनः॥ 22
परया श्रद्धया युक्तः कृतवानेक हायनम्।
ततः स्वहृदयांभोजे प्राणायामै र्महेश्वरम्॥ 23
संनिरुद्ध जटाजूड तरंगित सुरापगम्।
सम्यक् ध्यात्वा महादेव मतापसीत्तम उत्तमम्॥ 24
एवं तपस्यतस्तस्य तन्मयेनैव तिष्ठतः।
तस्मिन्नाम्रवणे पुण्ये अतीतं शरदां शतम्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

लिंगाद्दाविरभूदग्रे सहस्राकाधिक द्युतिः।
धर्मात्मनो महोक्षस्य पृष्ठमास्थाय शंकरः॥ २६
सविद्युच्छारदाभ्राभो देव्या गौर्या समन्वितः
वृषध्वजं महेशानं तय्यंत कृत वैभवम्।
विलोक्य सहसा शक्रो देवदेवं जगत्पतिम्॥ २७
उध्वदानंद संदोह रोमांचाचित विग्रहः।
तत्कृपा दृष्टि मात्रेण सहस्र भग चिन्हितः॥ २८
सहस्रपत्र पत्राभ सहस्र नयनान्वितः।
प्रणिपत्य सहस्राक्षमस्तोदानत कंधरः॥ २९

ज्ञानस्वरूपो भगवाननादिः
प्रसीदतु व्यष्टि समष्टि रूपः।
यः स्थूल सूक्ष्मादि विशेषणानां
अगोचरो यः परमार्थ रूपः॥ ३०

प्रसीद मायाहृत चेतनाय
प्रसीद भूतेंद्रिय मोहिताय।
प्रसीद तन्निग्रहणाक्षमाय
प्रसीद मह्यं भगवन् गिरीश॥ ३१
प्रसीद चन्द्रार्ध कृतावतंस

In Public domain. Digitization Muthulakshmi Research Academy

प्रसीद विश्वेश्वर विश्वमूर्ते ।
प्रसीद विश्वस्य निदान भूत
प्रसीद कंठोज्वल कालकूट ॥ 32

ऐन्द्राग्निपक्ष ममेरडित मेत्त मोहात्
कामाभिभूत मनसा कृतवानकृत्यम् ।
तन्मे क्षमस्व सकलेश्वर देवदेव
रत्न
श्रीशुद्ध ^ वरलिंग दयैकसिंधो ॥ 33

श्रीमच्छाक्षवणेश्वर त्रिपुरहन् श्रीकंठ गंगाधर
क्षोणी भृत्तनया निविष्ट विलसद्वामांग देवोत्तम ।
भक्तिस्त्वत्पद पंकजे भवतु मे मायापहर्त्री सदा
सर्वं सैव विधास्यते श्रित मनो भीष्टं यथा कल्पकः॥ 34

एवं प्रार्थ्यमानमिंद्रमवदत् स्मेराननाब्जः शिवो
वृत्तारे विहितेन ते सुतपसा प्रीतोस्मि नुत्याप्यहम्॥
यस्मादत्र सहस्र पत्र कुसुमै र्मा मर्चयिष्ठास्ततः
पत्राकार साहस्र नेत्र वपुषा त्वं राजसे संततम्॥ 35

वृत्रघ्ने विरस्त्व भाग वृषणं मेषस्य दद्युः शिव-
स्याज्ञा मेत्य तदा प्रभृत्य यमभून्मेषांड कोशो वृषा॥
आकाशात्कुसुमानि ते सुमनसः प्रीत्याभ्यवर्षंस्तदा

In Public domain. Digitization Muthulakshmi Research Academy

नृत्यंतिस्म सुरांगनाश्च विविधं काष्ठाः प्रसेदुर्दिश॥ ३६

अन्याययुर्देवगणाश्च सर्वे

रुद्रादित्या वसवो थाश्विनौ च।

साध्याः सुपर्णाश्च महोरगाश्च

देवर्षयो गुह्यका श्चारणाश्च॥ ३७

विश्वावसु नारद पर्वतौ च

गंधर्व मुख्याः सहचाप्सरोभिः।

ऐरावत च्छत्र सुचामरैश्च

तमीडिरे देवगणाश्च तुष्टाः॥ ३८

महानंद पुरीश्वरो हि भगवान् गतास्य वृत्रद्विषो

दत्ता तत्र वरं अलीयत महालिंगे सुरैरीडितः।

सुत्रामापि गजेंद्र मस्तकतले विभ्राजमानो भृशं

दीव्यच्छत्र सुचामरैश्च विधुतो देवैर्ययौ स्वःपदम्॥ ३९

इति दशशतनेत्र प्राप्तशापस्य मुक्तिं

द्विजवदन सरोजाद्यस्तु भक्त्या शृणोति

नहि भवति कदाचित्तस्य कुत्राप्यवज्ञा

जयति स महतीभिर्भूतिभिः पुत्रपौत्रैः॥ ४०

(इति स्कांदे पुराणे अगस्त्यसंहितायां

In Public domain. Digitization Muthulakshmi Research Academy

क्षेत्र खंडे आम्रवन माहात्म्ये चतुर्दशो

ध्यायः ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

॥ पञ्चदशोऽध्यायः ॥

ऋषयः॥ विचित्रतरमाख्यान मुक्तं सौते त्वयाधुना

कहोल तनुजस्यापि मातृ संगात्समुत्थितम् ॥ १

महत्पापं च तत्क्षेत्रे गत मित्युक्तवान् किल।

तदेतद्वर्ण्यतां मत्त श्रोतु मिच्छामहे वयम् ॥ २

सूतः॥ अस्ति शारद्वती तीरे ग्रामः शारद्वताह्वयः।

वेद वेदांत निष्णातैः शास्त्र स्मृति विचक्षणैः॥ ३

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपि समन्वितः।

कहोलो नाम तत्रासीत् ब्राह्मणो विजितेंद्रियः॥ ४

सर्वशास्त्रार्थ तत्त्वज्ञः शैव पंचाक्षरी परः।

लीलावतीति तस्यासीत् भार्या जांबूनद प्रभा॥ ५

पीनोन्नत कुचद्वंद्वी नीलोत्पल दलेक्षणा।

In Public domain. Digitization Muthulakshmi Research Academy

चारु पीनायत श्रोणी पूर्ण चन्द्र निभानना।
काले सा सुषुवे पुत्रं तेजसा दित्य सन्निभम्॥ 6
जात कर्म पिता कृत्वा ततश्चैकादशो हनि।
नाम चक्रे कुमारस्य मरुतांत इति स्वयम्॥ 7
मरु नाम महापाप स्तेन ग्लानिं गमिष्यति।
इति मत्वा पिता चक्रे मरुतांताख्य मात्मजम्॥ 8
किंचि कालांतरे सुभ्रू: पूर्व दुष्कर्म संजिता।
पातिव्रत्यं अतिक्रम्य पुंश्चली सा बभूव ह॥ 9
सौ तीव्र मदनाकृष्टा तपःशोषित विग्रहम्।
अक्षमं काम संतप्तौ जरा पलित मूर्धजम्॥ 10
विहाय स्वजनैश्शिष्टै वारितापि न चाभवत्।
अवेंगितेन तां ज्ञात्वा चर्ययाच सुदुश्चराम्॥ 11
गृहाद्विष्क्रामयामास पुत्रं स्थाप्य गृहे पतिः।
अथ सा पद्म पलाक्षी त्यक्त मात्रेण तत्स्थलात्॥ 12
अनेक विटैस्तरुणै रन्तरंगैः समन्विता।
विचचार श्मशान देशान् मोहयंती वयोगुणैः॥
लावण्येन च दिमेन तरुणान् देहसौष्ठवैः॥ 13

In Public domain. Digitization Muthulakshmi Research Academy

ततः कालांतरे रामा श्यामा हेमविभूषिता।
गोदावर्यास्तटं प्राप्य तत्रोत्तम पुरं गता॥ 14
ब्रह्म क्षत्रिय विट्शूद्रैश्चतुरंग बलैर्युतम्।
गमयंती च तत्रसान् पुनस्तत्र न्यतिष्ठत॥ 15
अथ कालांतरे तस्यास्तनुजश्च चिरोज्झितः।
सर्वेषु वेदशास्त्रेषु साक्षाद्धिषण वाक्ष्यितः॥ 16
प्राप्त यौवन संपन्नः पद्म पालाश लोचनः।
वाग्मी च मधुराभाषी सर्वेषां नयन प्रियः॥ 17
सचोत्तम पुरं प्राप्य तस्य राज्ञः सुजन्वनः।
बभूव सचिवो मुख्य स्तं गुणै रनुरंजयन्॥ 18
तमेव रूपसंपन्नं मरुतान्नं मुनेः सुतम्।
लीलावत्या सुतन्वंग्या घटयामास कश्चन॥ 19
सोपि मातर मज्ञात्वा बाल्य एव वियोजितः।
तद्धूर्त वचने मोहं प्राप दुष्कर्म यंत्रितः॥ 20
बलवानिंद्रिय ग्रामो विद्वांसमपि मोहयेत्।
अतस्ता मगमत्किंचि द्रहः स्थल मुपाश्रितः॥ 21
अथ संगम्य रहसि परस्पर मुभावपि।
प्रस्विन्न वदनौ भूत्वा वातायन समीप गौ॥ 22

In Public domain. Digitization Muthulakshmi Research Academy

सल्लापयंतावास्तां च निजवृत्तांत पूर्वकम्।
तदा विदित वृत्तांतौ मातृपुत्रौ बभूवतुः॥ 23
सुतस्तु तां प्रसूं ज्ञात्वा हा हा कष्टमिति ब्रुवन्।
मुमूर्छ शयने तस्मिन् प्रललाप पुनः पुनः॥ 24
ततो लीलावती शीघ्रं भृशं साकुलितेंद्रिया।
पाणिभ्यां परिरभ्यैनं निधाप्यांके च तच्छिरः॥ 25
तालवृंतेन विश्राम्य वचनं चेद मब्रवीत्।
उत्तिष्ठोत्तिष्ठ हे पुत्र मास्म शोके मनः कृथाः॥ 26
लोके संति च पापानि लघूनिच गुरूणिच।
ज्ञाताज्ञातानि तेषां च प्रायश्चित्तं तु विद्यते॥ 27
प्रायश्चित्ते कृते शास्त्रात्तद्रजः शाम्यते नृणाम्।
अतो त्व महतो गत्वा स्मृति पारंगतान् द्विजान्॥ 28
प्रणिपत्य पुरस्तेषा मात्म दोषं निवेदय।
पापानुगुण्यं ते श्रुत्वा प्रायश्चित्तं यथाश्रुतम्॥ 29
विदध्युः सुमहात्मानस्तव पुत्र दयालवः।
तदुक्तेन प्रकारेण प्रायश्चित्तं कुरु द्रुतम्॥ 30
तदनुष्ठान मात्रेण विशुद्धस्त्वं भविष्यसि।
नहि धीरा विमुह्यंति प्राप्तकृच्छ्रेषु किंचन॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

ऐश्वर्ये वा सुविस्तीर्णे मसने वापि दारुणे ।
रज्जेव पुरुषं बध्वा कृतांत : परिकर्षति ॥ 32
मम चैतद्विबुद्धिं च तनश्चिंतय पुत्रक ।
महाकुल प्रसूताहं महतश्च परिग्रह : ॥ 33
अगाच्छं त्वादृशं पुत्रं गतिरेतादृशी मम ॥ 33
अत स्तनूज सर्वत्र दुर्विभामा विधे गति : ।
इति तद्वचसा धीरो मरुतांतो मुने : सुत : ॥ 34
संध्या मुपासितुं काले सायाह्ने भूसुरोत्तमा : ।
तस्थु र्गोदावरी तीरे सर्व स्मृतिषु पारगा : ॥ 35
अथ तान् प्राणिपत्यासौ प्राप्त स्तन्मात् संगमम् ।
तेभ्यो निवेदयामास व्रीलितो विहितांजलि : ॥ 36
ततस्ते संगता विप्रा : श्रुत्वा तत्स्मृति पारगा : ।
पुन : पुन : समालोच्य मुनिपुत्रं वचोब्रुवन् ॥ 37
द्विजन्मन् श्रुणु वाक्यं न : प्रायश्चित्तं कृतांहस : ।
यत् कामतो महापापं नर : कुर्यात् कथंचन ॥ 38
न तस्य निष्कृतिर्दृष्टा भृग्वाग्निपतनादृते ।
अज्ञाना न्मातरं गत्वा तत्सपत्नीमथापि वा ।
स्वयमेव स्वकं मुष्कं छिंद्या त्साप मुदाहरन् ॥ 39

हस्ते गृहीत्वा तन्मुखं स गच्छेन्नैर्ऋतीं दिशाम्।
अज्ञानात् पुंश्चलीं पूर्वं जननीं त्वमगाः किल॥ 40
अत एवं विधास्यामः प्रायश्चित्तं महीसुर।
पापं हि तमसः कृत्स्नं तमोवर्णो ह्ययोमणिः॥ 41
मट
कार्ष्णायस मणीन् कंठे त्वं बद्ध्वा चरणीमिमाम्।
ग्रामेषु नियमाद्भिक्षां माहरेस्त्वं च भूसुर॥ 42
यावत्ते रुद्ररत्नानि भवंति मणयो द्विज।
तावत्क्षेत्राणि तीर्थानि पर्यटेस्त्वं समाहितः॥ 43
यदा ते रुद्ररत्नानि जानीह्यंहो निबर्हणम्।
तत्क्षणात् स्थापयेल्लिंगं यत्नाद्यं ह्यर्च्यते तव॥ 44
ब्राह्मणानपि तत्क्षेत्रे पूजयन् श्रुतिपारगान्।
यथावन्मुनिवर्य त्वं भावष्यसि न संशयः॥ 45
ततश्चायं विप्रो द्विज परिवृढानां गिरमिमां
निशम्य क्षेत्राणि प्रतिचरितुकामो द्विजवरान्।
प्रणम्य स्वकंठे सुविहित मयो निर्मिणि चयं
प्रतस्थे तं बद्ध्वा सपदि सह मात्रा वनमहीम्॥ 46
इति स्कांदे पुराणे अगस्त्यसंहितायां क्षेत्रखंडे
आम्रवणमाहात्म्ये पंचदशोऽध्यायः॥ १५ ॥१५॥

अथ षोडशोऽध्यायः॥

अथ तेषां वचः श्रुत्वा कहोलकसुतो द्विजः।
क्षेत्राणि यानि पुण्यानि तीर्थानि विविधानि च॥ 1
तानि सर्वाणि संप्राप्य चीरवासा जटाधरः।
स्नात्वा त्रिषवणं तत्र वंदित्वा दैवतानपि॥ 2
चचार बहुशः क्लिष्टो मात्रा सह विशुद्धये।
एवं द्वादश वर्षाणि क्षेत्राणि विचरन्नपि॥ 3
पुण्यतीर्थेषु च तथा गाहमानोऽपि किंचन।
अन्वपद्यत पापस्य निबर्हणमयं द्विजः॥ 4
दिष्ट्या कदाचित्कावेर्यास्तटं प्राप्य सुशोभनम्।
तत्र तत्र च तीर्थानि क्षेत्राणि च चरन्नसौ॥ 5
१४ A शुभमाम्रवणं प्राप गायत्रीसरितस्तटे।
मत्तबर्हिणसंघुष्टं द्विजवर्यनिषेवितम्॥ 6
तत्रागमनमात्रेण मनस्तुष्टिमपद्यत।
ततो द्विजकुमारोऽयं तपसा ब्रह्मणा पुरा॥ 7
निर्मिते पुण्यसलिले पुन्नागतरुसेविते।
दक्षिणे सरसि स्नात्वा नियमेन समाहितः॥ 8
ननाम च महालिंगं श्रीमदाम्रवणेश्वरम्।

In Public domain. Digitization Muthulakshmi Research Academy

स्वयं भक्तं मृगाङ्काद्यैः पूजितं च महर्षिभिः ।
प्रदक्षिणं चकारासौ भक्तियुक्तेन चेतसा ॥ 9
तत्क्षेत्र पूर्वदिग्भागे चचार तप उत्तमम् ।
एवं निवसतस्तस्य पंचषेषु दिनेषु च ॥ 10
बभूवुः शुद्धरत्नानि मणयो ग्रथिता गले ।
सर्वेच दृष्ट्वा तत्तस्य जैमिन्याद्यास्तपोधनाः ॥ 11
कहोलक सुतं विप्रं सुतेजस्कं समब्रुवन् ।
मरुतांत विपाप्मासि महालिंगस्य दर्शनात् ॥ 12
जननी संगदोषात्त्वं मुक्त एव न संशयः ।
बभूवुः शुद्धरत्नानि यतः कंठगतायसाः ॥ 13
इति तेषां मुनीन्द्राणां मरुतांतः शुभं वचः ।
मनः शांतिकरं शृण्वन् भृशं विच्युत कल्मषः ॥ 14
जहर्ष च बभासेच राहुमुक्त इवोडुराट् ।
मरुतांतोथ तत्क्षेत्र पूर्वस्यां दिशि भक्तितः ॥ 15
स्वनाम्ना स्थापयामास शैवं लिंगमनुत्तमम् ।
ब्राह्मणान् पूजयामास शिवभक्तान्महत्तमान् ॥ 16
अप्पंहर इति ग्रामः कारितश्च महात्मना ।
मरुतांतेश्वरं लिंगं प्रणिपत्य सकृत्पुमान् ॥ 17

In Public domain. Digitization Muthulakshmi Research Academy

मुच्यते सद्य एवायं महत: पातकादपि ।
अन्नायं मकतांतस्तु प्रणम्य मुनिपुंगवान् ।
जैमिन्यादीन्विनीत: सन् जगादेदं शुभं वच: ॥
अहं विमुक्तो महतश्च पातकात्
तपोधनानां भवतां सुसेवया ।
महार्हलिंगस्य च दर्शनादिह
क्षेत्रे शुभे ब्रह्मसर: सुशीतले ॥
मातेयमद्य कुलटा महा दोष दूषिता
प्यास्ते विमुक्त कलुषां कुरुत द्विजा ग्या ॥
संतोहि सत्पथमुपेत इवांशुमाली
बाह्यं तमो भुवि निहंति दया मयूखै: ॥
तदेतद्वचनं श्रुत्वा जैमिनि र्मुनि सत्तम: ।
२७ B उवाचैनं मुने: पुत्रं मध्ये सभं तपोजुषाम् ॥
माता ते व्रतमातिष्ठ नीलवस्त्रेण वेष्टिता ।
प्रत्यहं ब्रह्मतीर्थेऽस्मिन् निमज्ज्या मवणेश्वरम् ॥
महालिंगं सुसेवेत कृत्वा तस्य प्रदक्षिणम् ।
अंगारक चतुर्थीं च भविष्यति सुशोभनम् ॥
पर्वण: सोपरागस्य तुल्यात्मा कालवेदिभि: ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्यां स्नातं हुतं जप्तं दत्तं भवति चाक्षयम्।
पुरा तपस्यतः शंभोर्दाक्षायण्या वियोगतः॥ २४
फाल स्थला त्पपातैकः स्वेद बिंदु र्महीतले।
तस्मात्कुमारः संजज्ञे लोहितांगो महीतले॥ २५
स्नेह संवर्धितः सोयं धात्रा धात्री स्वरूपया।
भूम्या संवर्धितत्वेन भौमोयमिति कथ्यते॥ २६
माहेय इति च प्राहुर्यस्मिन् जातो दिनं च तत्
अंगारक मिति प्राहु र्मौहूर्तिक जना भुवि॥ २७
शैव तेजोंश भूतत्वात् दत्तस्यांगारकस्य हि।
तदीयं च दिनं श्रेष्ठं स्नान दानादि कर्मसु॥ २८
तस्मिन् दिने भिषेक्ष्यामि कलशैश्च शुभोदकैः।
जननीं ब्रह्म तीर्थेस्मिन् रजसा ते समाप्लुताम्।
ततो मुक्त रजस्केयं भविष्यति न संशयः॥ २९
इति तन्मुनिवाक्येन कहोलक नितंबिनी।
तदुक्त व्रत मातिष्ठ च्छिव नाम परायणा॥ ३०
तस्मिन् दिने च संप्राप्ते जैमिनि र्मुनिपुंगवः।
कलशैः स्नापयामास ब्रह्म तीर्थेन पूरितैः॥ ३१
स मेचकं वचनं तस्याः सुपांडरं भूमौ तदा।

In Public domain. Digitization Muthulakshmi Research Academy

कौमुदी नीरदापाये शारदीव बभौ च सा ॥ 32

अथ सा मृगशावाक्षी मुक्तांहा मुदितानना ।
जैमिनि प्रमुखान् सर्वान् प्राणिपत्येदमब्रवीत् ॥ 33

अहं च पुत्रश्च निबर्हितांहसा –
बभूव युष्माक मुदार तेजसा ।
तस्मात्र संजुष्ट महेश दर्शनात्
चिरंतनैः पुण्यचयैरिह स्थले ॥ 34

प्रसह्य पापं हरते चिरंतनं
पूजां विधत्ते विमलां च चेतसि ।
यशस्तनोति प्रथितं शुभोदयं
सतां नृणां संगतिरत्र जन्मिनाम् ॥ 35

इति स्तुवंतीं तामाह जैमिनिर्मुनिपुंगवः ।
पुत्रमाहूय तन्वंगि गम्यतां भर्तुरंतिकम् ॥ 36

त्वमेतत्क्षेत्र संगत्या विमुक्तां सर्वकिल्बिषात्
इदमेव प्रमाणं ते विरुद्ध माणि लोचनम् ॥ 37

इति सा वचनं श्रुत्वा तं नत्वा प्रत्यवोचत ।
तत्याज मां पुरा दोषान्मम भर्ता सुधार्मिकः ॥ 38

दोषापनयनं मेद्य न जानीते स किंचन ।

In Public domain. Digitization Muthulakshmi Research Academy

पुत्रेण वा मया प्रोक्तं वचनं स न विश्वसेत्।
साक्ष्य त्वेव यत्नावन्मां स तु नांगी करिष्यति ॥ 39
अतः किं करवाण्यार्य ब्रूहि विश्वास दायकम्।
लीलावत्या वचः श्रुत्वा भगवानाह जैमिनिः॥ 40
यन्त्रा शमीवने पूर्वं कृतदार क्रियावतोः।
स्त्री पुंसयोः प्रमाणार्थं हालास्य क्षेत्र उत्तमे॥ 41
तद्वनस्थः शमी वृक्षः सरश्च प्रसहृश्यत।
विचिकित्सावतां तत्र बंधूनां पुरतस्तयोः॥ 42
तदा तन्वंगि ते भर्ता न चेत्प्रत्यय इष्यते।
युवयो वाक्य संदर्भे तदा लीलावति स्मर॥ 43
चूत वृक्षमिमं पुण्यं ब्रह्मतीर्थं च तद्द्वयम्।
प्रत्यक्षं पुरतस्तस्य भविष्यति न संशयः॥ 44
ततस्तद्वचनं सुभ्रूः प्रमाणीकृत्य तेऽब्रवः।
विस्रंभेण सपुत्रां त्वां प्रीत्या परिग्रहीष्यति॥ 45
इति तद्वाक्यमाकर्ण्य प्रणिपत्य मुनीश्वरान्।
महालिंगं च नत्वैवं स्वदेशं ययतु मुदा॥ 46
अन्वेत्य पितरं वृद्धं सदा सर्व परायणम्।
माता सह प्रणम्यार्यं सर्वं वृत्तांतमब्रवीत्॥ 47

In Public domain. Digitization Muthulakshmi Research Academy

ब्राह्मणा बांधवाः सर्वे तत्र प्राप्ताः सुविस्मिताः।
संदिग्ध चेतसां तेषां प्रत्ययार्थं मुनेर्वधूः॥ ४९
अस्माद्वीदाम्रवृक्षं च ब्रह्मतीर्थं च संसदि।
द्वयं च तत्र सर्वेषां तस्थौ साक्षितया पुरा॥ ५०
घटनाद्दाय तत्तीर्थ्यं भंक्त्वा तच्चूतमंजरीः।
सर्वेषां दर्शयामास ददृशुस्ते च तद्द्वयम्॥ ५०
ततो ब्रह्मसरश्चूतवृक्षावपि च पश्यताम्।
पुरोन्तर्दधतुस्तत्र जनानां तौ च विस्मयम्॥ ५१
सर्वे च श्लाघयामासुर्मरुतांतं प्रसूयुतम्।
निदर्शनात् प्रमाणस्य सर्वे ते प्रत्ययं गताः॥ ५२
कहोलकः स्त्रियं प्राप्य पुत्रेण सहितस्तदा।
महतीं प्रीतिमगमत् ज्ञातिभिः सह बांधवैः॥ ५३
६ B अहल्यां गौतमः पूर्वं यथा प्राप्य मुदं ययौ।
ये च पुत्रार्थिनस्तत्र ये वा रोगप्रपीडिताः॥
ते सर्वे — मौन संयुक्ता ब्रह्मतीर्थे निमज्य च।
अंगारवारे तल्लिंगं अस्मिंश्चूतवने महत्॥
यदि प्रपूजयिष्यंति ते तत्कामानवाप्नुयुः।
अंगारवार संयुक्ता चतुर्थी यदि लभ्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

महालिंगं समभ्यर्च्य सद्यो विंदति कामनम् ॥ ५६

इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्रखंडे उपामावण माहात्म्ये षोडशो- ध्यायः ॥ ५. ॥ ५ ॥ ५ ॥ ५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ऋषय:॥ अस्ति भीमपुरं नाम वेगवत्यास्तटे शुभे।
नगरं तत्र विप्रेन्द्रो नाम्ना गुणनिधिर्महान् ॥ १
वेद वेदांग तत्वज्ञ: शिव भक्त धुरंधर:।
महाधनी महातेजा आसीदाचार तत्पर:॥ 2
तस्य जाता स्त्रय: पुत्रा: सुधियो गुणशालिन:।
प्रथम: सुमतिस्तेषां वेदमित्रो द्वितीयक:॥ 3
तृतीय: शिवधर्माख्य: सर्वे पितृ वशंवदा:।
शिष्य प्रशिष्य सहिता वेद शास्त्र विचक्षणा:॥ 4
कदाचित् पितरं सर्वे मुमूर्षुं प्राप्य दु:खिता:।
हितोपदेशं पुत्रास्ते प्रार्थयामासुरादरात्॥ 5
सोऽपि तान् प्राह हे पुत्रा: शृणुतास्य वचो मम।
सदा धर्मे मति: कार्या नित्यं कार्यं शिवार्चनम्॥ 6
प्रीतिश्च शिव भक्तेषु तथा शिव कथासु च।
कदाचिदपि रुद्राक्ष भस्म धारणयो: सुकृता॥ 7
मा प्रमाद्येत श्रेयो यदि नित्यमपेक्षथ।
नित्यमन्नै स्तर्पयत ब्राह्मणान् समयागतान्॥ 8
लोभे द्वेषे मुमनो विधत्ता यूयं यात तद्वशाम्।
कलहे रिरवे मोहे स्त्रियो मूलं विदुर्बुधा:॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

अत स्तास्तु न कुर्वीरन् स्नेहं च हृदयं गमम्॥ 9
विभागे बहवो दोषा नचे ज्येष्ठो नुमन्यते।
विभागं न प्रशंसंति पंडितास्तु कदाचन॥ 10
किंचैकं बच्मि वः कार्यं श्रूयता मादरेण च।
गगां भासि - - - - र्थं हि कार्यं निर्वपणं सुताः॥ 11
इत्येव मनुशास्यैतान् काल धर्म मुपेयिवान्।
अथ ते च त्रयः पुत्राः पितुस्तस्य महात्मनः॥ 12
चक्रिरे च यथा शास्त्रं - - - कीं क्रियाम्
कृत्वा - - - - - विप्रेभ्यः पितृन् प्रति सदक्षिणाम्॥ 13
कृतोदकाश्च ऽऽचयो ह्यभवंस्ते त्रय स्तत:॥
मध्यमो वेदमित्राख्यो ज्येष्ठं प्राह कृतांजलिः॥ 14
भवानेव पितृस्थानं त्वद्वृत्तं तस्य चाश्रयम्।
अतो भवान् गृहेस्थित्वा क्रियां कुर्वीत पैतृकीम्॥ 15
कनिष्ठः शिव धर्मार्थं बालो वसतु नो गृहे।
भवतश्च सहायोस्तु लौकिकेषु क्रियास्वपि॥ 16
अहं तु पितु रस्थीनि गुप्तान्यादाय सत्वरम्।
शिष्यैः पटुतरैः सार्धं काशीं यास्ये यथाश्रुतम्॥ 17
इति ज्येष्ठं समाभाष्य कृताशीस्तेन शोभने।

In Public domain. Digitization Muthulakshmi Research Academy

दिने प्रातिष्ठता ध्वानं प्रभुणा व्यनुमोदितः।
कस्मिंश्चिद्राजते पात्रे निदिध्यास्थीनि संगृहम् ॥ 18
स्वकर्मणः क्रियाकाले शिष्यहस्ते निधाय च।
शिष्यं प्रत्युक्तवान् किंचित् वेदनेत्रो रहस्यतः ॥ 19
इदं राजधनं शिष्य सावधानेन गोपय।
इत्युक्त्वा प्रस्थितो यात्रां पश्यन् विविधं स्थलम् ॥ 20
ततः प्राप्य सुपुण्यापां कावेरीं कल्मषापहाम्।
तदुत्तरे तटे रम्यां मुनिमंडलमंडिताम् ॥ 21
ब्रह्मतीर्थेन सुपुमां जगामाम्र वनस्थलीम्।
कृताप्लुतो ब्रह्मतीर्थे संतर्प्य पितृदेवताः ॥ 22
प्रणिपत्य महालिंगं रात्रौ सुष्वाप तत्र च।
सुवर्णकमलोपेतां सिद्धचारणसेविताम् ॥ 23
तुंगकल्लोलसंवीतां गंगां ब्रह्मसरोभवाम्।
दृष्ट्वा सविस्मयं ह्येष स्वप्ने रोमांचकंचुकः ॥ 24
हैवं - - - - वै समुत्थाय कृत्वा पौर्वाह्णिकीं क्रियाम्।
प्रयातुमुपचक्राम स्मरन्वै तस्य वैभवम् ॥ 25
तस्य शिष्यो रहःस्थितो किमेतद्राजकं धनम्।
इति पेटीं विवृत्यार्थं दृष्ट्वा तद्गतसंचयम् ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

अनर्घ्यतर रत्नानि वर्तन्तेस्मिन् हि भाजने॥ 26

इति भीत - - - .... - - - पिदध्ये पेटिकां पुनः॥ 27
ततः

काशीं कतिपयै र्मासैस्ते जग्मुरंजसा।

अदृश्यता क्ष्णो रेतस्य. वेदमित्र द्विजन्मनः॥ 28

गंगा सरिद्वरा तत्र तंडुल क्षालनां कुवत्।

किमेतदिति साश्चर्यं शिष्यानाह स भूसुरः॥ 29

किमेषा दृश्यते गंगा तंडुल क्षालनां कुवत्।

युष्माकं तु कथं शिष्या दृश्यते जान्हवीजलम्॥ 30

शिष्याः॥ गुरो रस्माकमियं गंगा दृश्यते दुग्धवत्सिता।

दृष्टमात्रेण सर्वेषां पापध्वंसविधायिनी॥ 31

श्रुत्वैष तेषां वचनं दूयमानेन चेतसा।

प्राहान्तेवासिनो वीक्ष्य वेदमित्रो द्विजाग्रणीः॥ 32

न तथा दृश्यते गंगा ममाक्ष्णो र्निर्जरापगा।

मया पराद्धं किं शिष्या दैआस्मि स्रोतसो धुना॥ 33

पिंगलाक्ष मया नित्यं स्नानकाले करे तव।

कलधौतमये पात्रे पितुरस्थि स्थितं पुरा॥ 34

राजकीयं धनं गोप्यमित्युक्त्वा दत्तमत्र वै।

प्रक्षिप्तमिति प्रोच्य प्राह त्रिपथगा नदी॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वमाम्रवणे स्वप्ने सिद्धचारण सेविता । 34

जांबूनद मयैः पद्मैः शोभमाना समंततः ॥ 35

क्षीरप्रपूरवच्छुभ्रा रत्नलिंग जटा तटात् ॥ 36

स्यंदमाना मया दृष्टा ब्रह्म तीर्थस्य मध्यतः ।

सेदानीं दृश्यते शिष्य तंडुलक्षालनांबुवत् ॥ 37

पिंगलाक्षो वचः श्रुत्वा गुरुणा समुदीरितम् ।

कृतांजलिर्गुरुं प्राह स्मृत्वा म्रवण वैभवम् ॥ 38

भगवन्मद्गुरो वृत्तं पेट्यामस्थि कदंबकम् ।

रुद्र रत्न समं दृष्टं मयाम्र विपिने शुभे ॥ 39

इदानीमत्र कृष्णत्वं कीदृशं भवतीति तत् ।

गुरुस्तद्वचनं श्रुत्वा पेटिकां तां विवृत्य च ॥ 39

प्रतीकं च समद्राक्षीत् पूतिगंध समन्वितम् ।

अहो तत्स्थल माहात्म्यं अज्ञानात् समागतम् ॥ 40

इयं दक्षिण काशीति प्रोक्तं तत्र महात्मभिः ।

अनादृत्य च तद्वाक्यं दृष्टं स्वप्ने च तत्स्थले ॥ 41

आगतोस्म्यत एवेयं विवर्णा दृश्यतेधुना ।

इति बुध्या विनिश्चित्य मृगंडुक्षेत्र मुत्तमम् ॥ 43

तत्र स्नात्वाथ संतर्प्य सर्वान् देवान् पितृनपि ।

In Public domain. Digitization Muthulakshmi Research Academy

विश्वेशं माधवं ढुंढिं गणनाथं च भैरवम् ॥ ५३

संपूज्य च यथान्याय मभिषेक पुरःसरम् ।

क्षेत्रोपवासं कृत्वाच प्रातः श्राद्धं विधाय च ॥ ५४

दत्वा दानं द्विजेभ्यश्च स्वस्य शिष्यैः समन्वितः ।

हृदये संदिहानो मस्थ्नां निक्षेपणं प्रति ॥

स्वपाप विश्वनाथस्य सन्निध्यौ मंटपे शुभे ॥ ५५

इति स्कांदे पुराणे अगस्त्य संहितायां

क्षेत्र खंडे आम्रवण माहात्म्ये सप्त

दशोध्यायः ॥ ५९ ॥ ५९ ॥ ५९ ॥ ५९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत: ॥ पितरं दृष्टवान् स्वप्ने विमानवरमास्थितम् ।
पुत्रं संबोध्य तेनोक्तं गिरा पीयूष तुल्यया ॥ 1
ममास्थि च समादाय यस्मिन्नहनि पुत्रक ।
इदं रत्नेश्वर क्षेत्र ब्रह्मतीर्थमुपेयिवान् ॥ 2
तृप्तो भवं स्नापाना न्नदनेहस्यग्नि - तम् ।
सेयं दक्षिण काशीति दिवि देवै: प्रशस्यते ॥ 3
त्वया दृष्टं च तत्स्वप्नं तथ्यमेव न संशय: ।
तत्र गत्वा ममास्थीनि ब्रह्मतीर्थ तटे क्षिप ॥ 4
इत्युक्त्वां तरसा तस्मात् पिता तस्य द्विजन्मन: ।
अथ प्रबुद्ध स्तत्स्वप्नात् प्रत्ययं प्राप्य मानसे ॥ 5
ततश्चाम्रा वणं प्राप्तुं अस्थि संचय माहरन् ।
स्वशिष्यै रखिलै: सार्धं संप्रतस्थे द्विजोत्तम: ॥ 6
तत: कतिपयै र्मासै रागतस्याम्र काननम् ।
मध्यान्हार्क प्रतप्तस्य पिपासा समजायत ॥ 7
समीपं ब्रह्मतीर्थस्य द्विजोयं प्राप्तवान.पि ।
अपश्यन् तत्र सरस्तत्र ब्राह्मणं कंचिदैक्षत ॥ 8
व्रतोपवास नियमै: परिक्षीण कलेवरम् ।
अतीव जीर्णवपुषं परिपिंग जटाधरम् ॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

मूर्तिमंतमिव प्रांशुं साक्षाद्धर्ममिव स्थितम्।
भारं शरीरयष्ट्यश्च हृदयष्ट्यां समर्प्य च॥ 10

16 B मध्यान्हे निर्जने तत्र वृक्षमूले समास्थितम्।
तस्य पार्श्वे स्थितां कांचित् स्त्रियं पलितमूर्धजाम्॥
सुप्रभां वेपमानांगीं अपि तत्र ददर्श सः॥ 11

Roman H- वेदमित्रः॥

पप्रच्छ तौ नमस्कृत्य कौ युवां किमिह स्थितौ।
पिपासा वर्तते तीव्र कुत्र मे वर्तते जलम्॥ 12
मुनिः॥ इतो दूरे समीपस्थ दृश्यते नाविलं जलम्।
तत् गत्वा पिब पानीयमर्कद्रुम सुशीतलम्॥ 13
इति तद्वचसा विप्रः प्रेत्य कृच्छ्रादुदक् दिशाम्।
दृष्टवान् तत्र सलिलं अपेयं कर्दमैः प्लुतम्॥ 14
अथ प्राणान् कथं धृत्वा पुनस्तद्देशमागतः।
ब्रह्मतीर्थं च तत्पार्श्वे दृष्ट्वा तापसमब्रवीत्॥ 15
यातायातेन किं ब्रह्मन् किमर्थं भ्रामरवेदयः।
त्वत्पार्श्वे वर्तते तीर्थं अतिस्वादुतरं महत्॥ 16
श्रांतोस्मि त्वद्वचः श्रुत्वा तपस्वी च भवान्हो।
मुनिः॥ त्रिंशत् योजनानां च गत्वा कांतार संकटे॥ 17

In Public domain. Digitization Muthulakshmi Research Academy

पुनः प्राप्तस्य ते क्षेत्र मिदं भारः कियान् वद।

॥ वेदमित्रः ॥

न जाने क्षेत्र माहात्म्यं अस्य तीर्थस्य वा पुनः॥ 18

अतो दूर मगां ब्रह्मन् काशीं भुवन विश्रुताम्।

को भवानंगना चेयं का वा ब्रह्मसरोंतिके॥ 19

अनया वर्तसे ब्रह्मन् किमर्थं वद सांप्रतम्।

युवयोर्दर्शनादेव जातोहं विगतश्रमः॥ 20

मुनिः॥- राजशेखरनामाहं मियं क्ष्माभृत्सुता मया।

परिणीता ततश्चास्यां कुमारः समजायत॥ 21

तं च राज्येभिषिच्यावां वार्धक्याद्वनमागतौ।

अर्थांतरपरां वाच मुक्त्वैवं पुनरब्रवीत्॥ 22

मुनिः॥- आवयोरपि विप्रेंद्र तृष्णा संपरि वर्तते।

अस्मात्तीर्थं भवान् शीघ्रं समानयतु सांप्रतम्॥ 23

इति तद्वचनं विप्रो ब्रह्म नाम सरोजलम्।

आदाय नलिने पत्रे दत्तवांश्च तयोरपि॥ 24

निपीय तज्जलं वृद्धे युवानौ तौ शशि प्रभा।

अभूतां रूप संपन्नौ दिव्यमंगल विग्रहौ॥ 25

उभा वपि मिलित्वाथ तस्य विप्रस्य पश्यतः॥

In Public domain. Digitization Muthulakshmi Research Academy

राजशेखरे लिंगे यातो बिल्वमंजसा ॥ 26
लिंगे तद्बिल्वं वीक्ष्य वेदमितो द्विजोत्तमः।
महदाश्चर्य संपन्नो मनस्येवमचिंतयत् ॥ 27
गौरीशाना विमौ दृष्टौ यौ लिंगे तु लयं गतौ।
ममाज्ञता निवृत्यर्थं दर्शितः क्षेत्र वैभवः ॥ 28
महत्क्षेत्र मिदं पूर्वं प्राप्तवानपि मूढधीः।
अज्ञात्वैतस्य माहात्म्यं दूरे काशीं गतोस्म्यहम् ॥ 29
तृषापानीय याञ्चां मे कुर्वतो दूरतो जलम्।
पंकिलं दर्शयिन्नेष ब्रह्मतीर्थ मदर्शयत् ॥ 30
यातायातेन काश्यां मे भ्रांति मात्रं अदंबयत्।
एतद्ब्रह्म सरस्तीर्थ पानमात्रादुपेयुषो ॥ 31
तारुण्यं गत वार्धक्यो दर्शयामासतुर्मम।
तीर्थ माहात्म्य मेतस्य क्षेत्र माहात्म्य मुत्तमम् ॥ 32
राजशेखर नामेति चंद्रचूडः प्रकाशितः।
क्ष्माभृत् सुतेति गिरिजा पतित्वमपि दर्शितम् ॥ 33
अहमस्मि कृतार्थोद्य येन तौ चाक्षुषौ कृतौ।
पानीयमपि मे पाणे गृहीत्वापि तमप्यहो ॥
यज्ञैरिष्टं मया पूर्वं दत्तं भूरि द्विजातिषु ॥ 34

In Public domain. Digitization Muthulakshmi Research Academy

पानीयं शीतलं दत्तं घर्मकाले द्विजातिषु ।
येनेशानो जगद्धाता मत्पार्श्वे जलमापिबत् ॥ 35
स एवं हर्षशोकाभ्यामन्वितो लालितो नुगैः ।
ब्रह्मतीर्थजले स्नात्वा संतर्प्य पितृदेवताः ॥ 36
तत्र आम्रवणेशानं ब्रह्मादिसुरवंदितम् ।
वंदित्वा स्तौ द्विनीतः सन् आनंदाश्रुकणाप्लुतः ॥ 37
धाता यः पततां वरो विचिनुते यन्मौलिभागं दिवि
श्रीशः क्ष्मातलमाविशन् विचिनुते क्रोडात्मना यत्पदम् ।
तत्ताद् भवस्यति त्रिपुरहन्त्रा मातृवी क्ष्मापते ।
नैवेशोवमहं तृणा न गणितां स्तुत्यं नगोह केवलम् ॥ 38
इति स्मृत्वा वेदमितो द्विजः प्रीत्या मुहुर्मुहुः ।
प्रणिपत्य स्वशिष्यैश्च निशि ब्रह्मसरस्तटीम् ॥ 39
अध्युवास ततोस्वाप्सीत् सांगोप्यांगानि कुत्रचित् ।
ततः प्रातः सरस्तीर्थे स्नात्वा प्रीतः क्रियामपि ॥ 40
समाप्य स्वप्यपेटीं तां विवृत्यालोकयत् स्वयम् ।
शुद्धरत्नानि तान्यंगान्यास्सेतानि ततो द्विजः ॥ 41
दृष्ट्वा विस्मयमापन्नो ननंद मुनिभिः सह ।
ततो ब्रह्मसरस्तीरे गोदुग्धैरभिषिच्य च ॥ 42

In Public domain. Digitization Muthulakshmi Research Academy

संस्थाप्यास्थि चयं तत्र हिरण्य शकलैः सह।
गो भू हिरण्य दानानि पितृ प्रीतिकराणि वै ॥ 43
विप्राय प्रीतिमापन्नः कृत्वा श्राद्धानि शास्त्रतः।
प्रत्यहं च महालिंगं अर्चयित्वादरेण तु ॥ 44
तत्र तान् श्रोत्रियान्सम्यगन्नैः संतर्प्य भूसुरान्।
ततः कृतार्थश्छात्रैश्च स्वपुरं प्राप्य तद्द्विजः॥ 45
सोमशेखर पांड्यस्य भ्रातृ बंधु सुहृज्जनाम्।
उक्त्वैतत्सर्व वृत्तांतं यदाम्रवण संभवम् ॥ 46
प्रपेदे च परां प्रीतिं श्लाघितो बंधुभिर्जनैः।
सश्रद्धमेतदध्यायं पठन् शृण्वंश्च मानवः॥ 47
पितृ प्रसादं संप्राप्य महतीं श्रियमश्नुते ॥ 47

इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्र-
खंडे आम्रवण माहात्म्ये अष्टादशोध्यायः॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ एकादशोऽध्यायः ॥

ऋषयः॥ सूर्यः किमर्थं तल्लिंगं रुद्र रक्षोघ्नामकम्।
अर्चयामास तत्सर्वं शंस नः सूतनंदन ॥ 1

सूतः॥ दक्षः प्रजापतिः पूर्वं श्वशुरो जगतां गुरुम्।
महेशानमनाहूय प्राजापत्यावलेपनात् ॥ 2
यज्ञं चक्रे सुरैः सार्धं न च तस्मै हविर्ददौ।
देवाय महते यज्ञे मूढधीः स प्रजापतिः॥ 3
अथ दाक्षायणी जायं चंद्रचूडमभाषत।
भगवन्नार्य लोकेश भवता सह मत्पितुः॥ 4
यज्ञमीक्षितुमाकांक्षे विधेहि करुणां मयि।
आर्याया वचनं श्रुत्वा भगवान् वृषभध्वजः॥ 5
प्रत्याह वचनं देवीं प्रफुल्लकमलाननाम्।

शिवः॥ पिता तव न मे रूपं सच्चिदानंदलक्षणम्॥ 6
न जानाति विमूढात्मा मद्ब्रह्मत्ववैभवः। मद्ब्रह्मत्ववैभवात
अन्यथा वेत्ति शर्वाणि न गंतव्यमतः सवे॥ 7
इति तद्वचनं श्रुत्वा महेश्वरमुवाच सा।
अहं वा तत्र यास्यामि मामनुज्ञातुमर्हसि॥ 8
यज्ञार्थमागतान् देवान् द्रष्टुमिच्छामि धूर्जटे।
अथ तां प्राह देवेशो यदि गच्छसि तत्स्वयम्॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

महाजनर्यो जायेत व्रज जाये यथा मनः॥

इत्युक्त्वा प्रमथैः सार्धं विप्रेष सवने द्विजाम्॥ 10

अथ सा प्रमथैः सार्धं नानाविध गणावृताम्।

यज्ञशालां समागम्य तूष्णीं तस्थौ तदंतरे॥ 11

दक्षः पिता मृडानीं तां दृष्ट्वा न स्वागतं वचः।

किंचिदूचे न सूर्याद्या देवा वा किंचिदूचिरे॥ 12

न कोऽप्युपचितिं तस्मै चक्रे संसदि किंचन।

अथ सा प्रति ध्याविष्टा वचनं परमेशितुः॥ 13

स्मृत्वा पितरमालोक्य जज्वालाग्निवदाज्यतः।

प्रज्वलंतीं रुषा देवीं दृष्ट्वा पूषा जहास च॥ 14

केचिच्चकंपिरे तत्र त्रिदशास्ते शिशांसि च।

रुद्राणी तत्र आलोच्य तातेस्मिन् मूढ चेतसि॥ 15

जातमेतच्छरीरं मे गिरिशाय महात्मने।

न समर्पयितुं योग्यं अतोऽन्यद्देहमात्मनः॥ 16

संपादयिष्ये हुत्वेमं आज्य धारामिवानले।

अस्मिन् जनितदेहायाः प्रायश्चित्तमिदं मम॥ 17

इति मत्वा महेशानं स्मृत्वा चाश्रु विलोचना।

शास्तु देवानिमान् मूढान् शास्ताहि परमेश्वरः॥ 18

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्त्वा प्रविवेशासौ वैताने जातवेदसि ।
ततो हलहला शब्दो महानासी त्समांतरे ॥ 19
त्रिभीयां चक्रिरे देवा: प्रलपंते स्म केचन ।
एतस्मिन्नंतरे देव: सर्वज्ञो जगतीपति: ॥ 20
ज्ञात्वा व मानं शर्वाण्या: प्रवेशं च हुतार्चिषि ।
अनेक बाहु साहस्रो: प्रलयाग्नि सम प्रभम् ॥ 21
नाना प्रहरणोपेतं भ्रुकुटी भीषणाननम् ।
वीरभद्रं समुत्पाद्य क्षोणीहत जटातटात् ॥
यज्ञं नाशाय दक्षस्ये त्यादिदेश पुरस्थितम् ॥ 22
स महान् वीरभद्राख्य: प्राप्य दक्षस्य तत्क्रतुम् ।
छित्वा जुहाव दक्षस्य शिरो ज्वलति पावके ॥ 23
पूषणं ताडयामास कपोले तस्य ताडनात् ।
निपेतुर्दशना: सर्वे प्रसृतै रुधिरै: सह ॥ 24
पदा संताडितश्चंद्र: पाताले निपपात ह ।
भग्न बाहूरुचरणा: पेतु: केचित् सुरा भुवि ॥ 25
भृग्वादि तापसानां च श्मश्रूणि प्रलुलाव स: ।
एवं प्रध्वंसयामास वीरभद्रो महाक्रतुम् ॥ 26
अथ नारायणो देव: प्रादुर्भूय जवेन स: ।

In Public domain. Digitization Muthulakshmi Research Academy

स्तुतोपनिबद्धां वाक्यैः देवदेवं जगत्पतिम्॥ 27

यज्ञं निर्वर्तयामास भरताज शिरः सवै॥

यजमाने निद ------- वमव्ययम्॥ 28

साच दाक्षायणी देवी जज्ञे पर्वतराट् सुता॥

भूयसा तपसा भूयः प्रपेदे तं शिवं पतिम्॥ 29

प्रलीने कुत्रचित्पूष्णि रुद्रस्य महतो भयात्।

ज्योतिष्मान्नाम तेजस्वी बभूव प्रमथाधिपः॥ 30

तेन देवो महादेवो भास्वत्कृत्य मकारयत्।

ततो विवस्वान् ब्रह्माणं शरणं प्रेत्य तद्गिरा॥ 31

स्वापराध विशुध्यर्थं रुद्ररत्नेश्वरं क्षितौ।

तपसाराध्य तं देवं चिरदाम्रवणे शुभे॥

अहः परिवृद्धो ध्या- यथावत्तत्प्रसादतः॥ 32

इति स्कांदे पुराणे अगस्त्य संहितायां क्षेत्र-

खंडे आम्रवण माहात्म्ये एकोनविंशो ध्यायः॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ऋषय: ॥ संज्ञा देवी रवेः पत्नी कुत आकाबर्णोऽवरम्।
अर्चयामास भो सौते विस्तरं कथयस्वहि ॥ 1
सूत: ॥ शृणुध्वं ऋषयः सर्वे संज्ञायाश्चरितं महत्।
मारीचेः कश्यपात् जज्ञे दाक्षायण्यां विकर्तनः॥ 2
तस्य भार्याभवत्संज्ञा पत्नी त्वष्टुः प्रजापतेः।
त्रीण्य पत्यानि संज्ञायां अजायंत विवस्वतः॥ 3
वैवस्वतो मनुर्ज्येष्ठो यमश्च यमुना ततः।
सा सोढु मक्षमा संज्ञा तेजस्तत्तिग्म तेजसः॥ 4
स्वच्छायां निर्ममे कांतां सुवर्णां रूपशालिनीम्।
प्रांजलिः प्रणता भूत्वा छाया संज्ञामवोचत ॥ 5
तवाज्ञाकारिणी देवि शाधि मां करवाणि किम्।
संज्ञोवाच ततः छायां सवर्णि शृणु मद्वचः॥ 6
परीरंभणमेतस्य चंडांशोः सोढु मन्वहम्।
अक्षमा सदनं त्वष्टुः यास्यामि त्वामहावस ॥ 7
स्वापत्यदृष्ट्या द्रष्टव्यमेतद्बालत्रयं च मे।
अनाख्येय मिदं वृत्तं त्वया पत्युर्वरानने ॥ 8
इत्यादिश्य सवर्णां तां पत्युर्गेह मुपागमत्। (सद)
पितुरंतिकमासाद्य प्रणिपत्येद मब्रवीत् ॥ 9

तात सोढुं न शक्नोमि तेजस्तेजोनिधेरहम् ।
अतस्त्वत्सदनं प्राप्ता विश्रान्त्यै सुचिरादहम् ॥ 10
निशम्य वचनं तस्याः पिता पुत्रीमुवाच ह ।
पिता रक्षति बाल्येषु भर्ता रक्षति यौवने ॥ 11
पुत्रो रक्षति वार्धक्ये न स्त्री स्वातंत्र्यमर्हति ।
पतिश्च तव सर्वज्ञो लोकचक्षुस्तमोपहः ॥ 12
त्वमेव तपसा सोढुं यतस्व क्षेत्र उत्तमे ।
ईदृशो वा भवेद्भर्ता न च त्याज्यः कदाचन ॥ 13
तस्मिन् जीवति कल्याणि राजते भरिता सुखैः ।
सर्वासां संपदां मध्ये भर्तैव परमंडनम् ॥ 14
वध्वा भर्तृविहीनायाः संपदा किं प्रयोजनम् ।
पितुर्वचनमक्लिष्टं श्रुत्वा संज्ञाप्यचिंतयत् ।
कुत्र गत्वा तपः कुर्यां कथं प्राप्स्यामि हृद्गतम् ॥ 15
एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः ।
तां प्राह यमिनां श्रेष्ठो विहितापचितिस्तया ॥ 16
शृणु मे वचनं संज्ञे जानामि त्वन्मनोगतम् ।
अनाराधितशर्वस्य न सिध्यति मनोरथः ॥ 17
यदाहुः परमं ब्रह्म प्रधानपुरुषात्परम् ।

In Public domain. Digitization Muthulakshmi Research Academy

यन्मायया ततं सर्वं तमाराध्य शंकरम् ॥ 18

मेरोर्दक्षिणत: पार्श्वे वर्षे भारत संज्ञके ।
कर्तव्याहि तपश्चर्या सर्वेषामपि कर्मिणाम् ॥ 19

पूर्वं तव पति: संज्ञे दक्षयज्ञे महेश्वरे ।
अनर्पितं हविर्जग्ध्वा कश्मलं समुपाविशत् ॥ 20

ततो विवस्वान् ते भर्ता रुद्रस्य महतो भयात् ।
सहसा विजिमभ्येत्य कंपमानो मुहुर्मुहु: ॥ 21

वचसा तस्य शीघ्रेण महत्वाकावर्णं शुभम् ।
कुबेरदुहितुस्तीरे शोभमानमुपेत्य च ॥ 22

श्रद्धेश्वरं नाम महालिंगं सनातनम् ।
अर्चयित्वा भयान्मुक्त: स्वं धाम प्रतिपद्विवान् ॥ 23

अतस्त्वमपि तद्गत्वा - - - - - - - - श्वरम् ।
तत्र ते भर्तृयोगश्च - - - भविष्यति सुखिष्यसि ॥ 24

अथ सा तमनुज्ञाप्य प्रणिपात पुर:सरम् ।
वडबारूपमभ्येत्य तत्क्षेत्रं तपसे ययौ ॥ 25

मन्यमानोथ तां संज्ञां सावर्णां तां तदा रवि: ।
संततिं जनयामास मनुमष्टममुत्तमम् ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

शनैश्चरं द्वितीयं च सुतां भद्रां तृतीयकाम्।
कदाचिच्छमनः प्रीत्या पितुरङ्कमुपाविशत्॥ 27
तं वीक्ष्य असहमानो सौ शनिः शमनमब्रवीत्।
हे रे शमन तातांकमारोढुं कथमर्हसि॥ 28
तव माता न सा तास्ति कुतश्चिदपलायत।
यस्यां वध्वां पिता प्रीतस्त्वत्सुतं लालयेत्पिता॥ 29
तत्सुतः पितुरुत्संगं समारोढुं समर्हति।
प्रसूर्मे सुतरां प्रीता वर्तितस्य न ते प्रसूः॥ 30
इति तद्वच आकर्ण्य शमनः स्फुरिताधरः।
छायायास्तनयं रुष्टः पदा शनिमताडयत्॥ 31
स मूर्छितश्च भग्नांघ्रिः पपात धरणीतले।
ततश्छाया समागम्य पुत्रमाश्लिष्य सत्वरम्॥ 32
कोपाच्छशाप शमनं भव त्वं प्रेतराडिति।
शनैश्चरः पंगुपादस्तदा प्रभृति चाभवत्॥ 33
मातृशापाद्यमोप्येष प्रेतराट्त्वमुपागमत्।
अपराधसहस्रेऽपि जननी न शपेत् सुतम्॥ 34
मातृशापोऽन्यथा कर्तुं न शक्यः केनचित् क्वचित्।
तयोः संवादमालोक्य भगवान् दिवसेश्वरः॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

सर्वमेतच्च वृत्तांतं ज्ञानवान् ज्ञानचक्षुषा ॥
तपस्यंतीं च तां ज्ञात्वा महसाश्रवणे शुभे ॥ 36
मरुद्वृत्या तटं प्राप्य महर्षिगण सेवितम् ॥
तदाश्रवण मभ्येत्य ददर्श बडबां च ताम् ॥ 37
नीरसानि तृणान्येव तृणंतीं योग मायया ॥
अनेन वं सुविज्ञाय स हरि हरिरूपिणीम् ॥ 38
रूवष्योणां - - णया तस्यां मिलित्वाऽय मरीश्मत् ॥
साच तं स्वपतिं ज्ञात्वा घ्राणस्य विवर द्वयात् ॥ 38
आजहार च तच्छुक्रं संजज्ञाते ऽश्विनौ तत : ॥
अतीव रूपसंपन्नौ देवलोक भिषग्वरौ ॥ 39
ततोयं दर्शयामास स्वात्मान मति सुन्दरम् ॥
तुतोष सापि तं दृष्ट्वा मित्रं नेत्रमुदावहम् ॥ 40
ततो नया महालिंगं रवि राश्रावणेश्वरम् ॥
संपूज्य मन्वितस्त्वष्ट्वा भ्रामिमारोप्य यत्नत : ॥ 41
शातितं तेजसा खंडं पौषणं ममत द्युति ॥
त्वष्टैव तेजसा तेन विष्णुचक्र मकल्पयत् ॥ 42
शूलं च परमेशस्य शक्तिं पावकजन्मन : ॥
सह्याकृतिश्च संज्ञाया : शाणोल्लीढ मणे : सम : ॥ 43

In Public domain. Digitization Muthulakshmi Research Academy

बभूव भगवान् पूषा संज्ञादेवी तुतोष च।

रुद्धरत्नेश्वरं लिंगं ब्रह्मानंद पुरीश्वरम् ॥ 44

प्रणिपत्य स्वकं धाम संज्ञया सह तिग्मगुः।

दैवतैः पूज्यमानश्च प्रपेदे भासयन् दिशः॥ 45

इति स्कांदे पुराणे अगस्त्य संहितायां

क्षेत्रखंडे आम्रवण माहात्म्ये विंशोऽध्यायः॥

॥ ॥ ॥ ॥ ॥ ॥ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ऋषयः॥ सूत चंद्रः कथं शते रीश्वरत्वमुपेयिवान् ।
समाराध्य महालिंगं रुद्धरत्नेश्वराभिधम् ॥ +
आचक्ष्व श्रोतुकामाना मस्माकं त्वं सविस्तरम् ॥ 1
सूतः॥ ब्रह्मणो मानसः पुत्रः प्रजापति समो गुणैः ।
महर्षि भगवानत्रि स्तेजसा दित्य सन्निभः ॥ 2
सन्नि गृह्योन्द्रिय ग्रामं महात्मायं महातपाः ।
ऊर्ध्वरेता महातेजा ध्यायन् हृदि महेश्वरम् ॥ 3
त्रीणि वर्ष सहस्राणि चकारात्रि स्तपो महत् ।
ऊर्ध्वं संक्रमितं तेजो सोमत्व मगम द्द्विजोः ॥ 4
नेत्राभ्यां तच्च सुस्राव दशधा द्योतयन्द् दिशः ।
पतितं सोम मालोक्य रुद्धरत्न मिव स्थितम् ॥ 5
पिता महः समालोक्य लोकानां हितकाम्यया ।
निशायां रत्नमारोप्य स्वं धाम प्रतिपद्यच ॥ 6
रक्षामृत संक्लेदैः सोमृतांशु रवर्धत ।
सच सोमः प्रबुद्धोय मात्मभासा दिशो दश ॥ 7
द्योतयंश्च तपः कर्तुं यतते स्म महायशाः ।
ततो ब्रह्माण मभ्येत्य प्रणिपत्य स्थितो व्रतः ॥ 8
विरुद्धरत्न सच्छायं दृष्ट्वा सोमं प्रजापतिः ।

In Public domain. Digitization Muthulakshmi Research Academy

सो गत्वं निशि जातोसि नेत्राभ्या मूर्ध्व तेजस:। 9
मम मानस पुत्रस्य मुने रत्रे: स्तेजस:॥ 9
अतस्त्वं तपसाराध्य रुद्ररत्नाभिधं महः।
लिंगरूपं महद्भूमौ चकारस्त्याम्र वनी तले॥ 10
यन्मे दुर्वचसा पूर्वं जगत्कश्मल माविशत्।
तन्महालिंग माराध्य यत्नावत्वमशां पुरा॥ 11
यथा सूर्यो दिवानाथो निशानाथस्तथा भव।
आप्लायस्व जगत्सर्वं तिग्मो सौगर्लेपितं रवे:॥ 12
निशि शीत मयूखै स्त्व मोषधीश्चापि संततम्।
त्वं चंद्र इति नाम्नासि यतश्चंद्रयसि प्रजा:॥ 13
नव वर्षाणि वर्तंते रत्नसानोर्हि दक्षिणे।
अष्टौ किंपुरुषादीनि देव भोग्यानि तानि तु॥ 14
यत्तत्र भारतं वर्षं कर्मभूमिरिति स्मृतम्।
तत्रापि हिम सह्याद्रेरंतरं पुण्यदं पदम्॥ 15
तत्रापि सह्य सेतोश्च मध्यदेशो ति पुण्यद:।
अतस्त्वं सह्यजा तीरे गायत्री सरितस्तटे।
रुद्ररत्नं महालिंगं तपसाराज्यस्व ह॥ 16
रुद्र कोपान्निरानंदो भूत्वा तत्क्षेत्र मेयुष:।

In Public domain. Digitization Muthulakshmi Research Academy

ममानंदो यतो जातो ब्रह्मानंद पुरीं विदुः॥ 17

ब्रह्मतीर्थ मिति ख्यातं मत्कृतं वर्तते महत्।

महाधिपत्यं लभते यो लिंग मर्चयन्॥ 18

अतस्त्वं शुभ्ररत्नेशं शुभ्ररत्नैः समर्चय।

इति तद्वचसा त्रेयः सोमस्तं प्रणिपत्य च॥ 19

जंबूद्वीपं समासाद्य दक्षिणां दिशमभ्यगात्।

मरुद्वृधां ततः प्राप्य प्राप्य चाम्रवनीं शुभाम्॥ 20

तपस्तेपे विशुद्धात्मा शुभ्ररत्नेशमर्चयन्।

दिव्य वर्ष सहस्रांते भगवान् फाल लोचनः॥ 21

प्रादुरासीन्महातेजा उमया सह शंकरः।

तपस्यंतं तमात्रेयं दृष्ट्वा चंद्रमसं हरः॥ 22

उवाच विशदी कुर्वन् स्मित पूरेण ता दिशः।

तुष्टोस्मि तपसा वत्स तीव्रैश्च नियमैरपि॥ 23

निशा वितिमिराः कुर्वन् निजैः प्रसृमरैः करैः।

निशानाथो विराजस्व कलाभिर्हर्षयन् सुरान्॥ 24

त्वत्पीयूषमयैर्हस्तैः स्पृष्टमेतच्चराचरम्।

तप्तं च भानुभिर्भानोः परां ग्लानिं विहास्यति॥ 25

उमया सहितं यन्मां भक्त्या पूजितवानिह।

In Public domain. Digitization Muthulakshmi Research Academy

लोके सोम इति ख्यातं तव नाम भविष्यति॥ २६
अतस्ये तव कलामेकां मूर्ध्नि मे यशसे तव।
इत्युक्त्वांतर्दधे लिंगे महादेवः सहोमया॥ २७
एवमाम्रवणेशस्य महादेवस्य चंद्रमाः।
प्रसादाद्यामिनीशत्वं बभौ प्राप्य नभस्थले॥ २८
एवं तपश्चंद्रमसस्तज्जन्म चरितं च यः।
पठति श्रद्धया नित्यं निव्याध्मामृतमश्नुते॥ २९
इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्रखंडे आम्रवण माहात्म्ये एकविंशो-
ध्यायः॥ ५॥ ५॥ ५॥ ५॥

In Public domain. Digitization Muthulakshmi Research Academy

कश्यपः ॥ विन्ध्यस्य च तपसो विघ्नं किमर्थं सरितां पतिः।
चकार यस्य शापेन पुरा नापात्मनो शुचिम् ॥ 1
वार्ध्यश्वो नाम ब्रह्मर्षिः सदा वार्धिपरायणः।
हृदब्ज कुहरे नित्यं चंद्रखंडावतंसकम् ॥ 2
कालकूट लसत्कंठं सांबं संसार भेषजम्।
ध्यायन्तपस्यां महतीं दुष्करामकृतात्मभिः ॥ 3
चकार निश्चलो भूत्वा ह्रदे तिष्ठन् पयोनिधेः।
तत्तपो वीतिहोत्रेण त्रिविष्टपमतप्यत ॥ 4
यादोभिः सह पाथोधिः क्वथितो भूत्समंततः।
ततः शक्रमुपागम्य देवा अग्नि पुरोगमाः ॥ 5
अवदन्नागदातंकं वार्ध्यश्व तपसा कृतम्।
तच्छ्रुत्वा वलभित्कांश्चिद्राक्षसान्क्रूरकर्मणः ॥ 6
मलिम्लुचारव्यानाहूय वचनं चेदमब्रवीत्।
भो राक्षसा अकूपारं गत्वा यूयमितो जवात् ॥ 7
विसार्य जलधेरंतः समंता द्वागुरा दृढाः।
तपस्यंतं मुनिं तत्र दाशवेषेण संयुताः ॥ 8
आकृष्य मत्स्य संघेन तटं नयत सत्वरम्।
इति तद्वच आकर्ण्य बलिनस्ते मलिम्लुचाः ॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

पाथोनिधिं समागम्य वागुराभिः समंततः॥ 9
त्वरेण मृगयामासुर्वार्ध्यर्णवं तपसां निधिम्।
क्वापि कोणे समुद्रस्य स तिष्ठन् तैर्विलोकितः॥ 10
ततो रहसि तानूचे समुद्रः सरितां पतिः।
प्लक्षद्वीपे ह्रदे गाधे नागारण्ये वर्तते मुनिः॥ 11
तमेनं जालकैर्यूयं समाकर्षत नैर्ऋताः।
साहाय्यं वः करिष्येऽहं उत्तुंगैरूर्मिभिर्मम॥ 12
एतत्तपोग्निर्यादांसि सदा दहति वार्यपि।
इति तद्वचनात् कृत्वा प्लक्षद्वीपं ततो ह्रदम्॥ 13
बलादाचक्रषुस्तत्र नाकृष्टुमभवंश्च ते।
ततः समुद्र उत्तुंगैस्तैरंगैर्वागुरावृतम्॥ 14
उच्चिक्षेप मुनिं तीव्रं ततस्तटमनीनयन्।
अपकृष्टो मुनिस्तीरे तरंगैरपि जालकैः॥ 15
तपोंतरायं विज्ञाय पैशुन्यं च सरित्पतेः।
साहाय्यं च कृतं तेन दाशवेषेण दाशवेषिणाम्॥ 16
कोपसंरक्तनयनो वरुणं तमशीशपत्।
मुनिः॥ तीर्थी भवंति तीर्थानि तीर्थानामवगाहनात्॥ 17
अवगाह्य चिरं कालं तव तीर्थे सरित्पते।

तपसाराधयन्तं मां रुद्रं त्रिजगतां पतिम् ॥ 17

यातुधानसहायस्त्वमूर्मिभिः पर्वतोपमैः ॥ 18

अनीनयो हि कूलं ते पाठीनैः सह संप्रति ।

अतस्त्वं मशुचिर्भूयाः सर्वथा पाथसां पते ॥ 19

इति शप्तो मुनीन्द्रेण वार्ध्यश्वेन सरित्पतिः ।

शुद्धरत्नैः समभ्यर्च्य प्रणिपत्यैनमब्रवीत् ॥ 20

प्राधाक्षुर्भगवन् तीव्रं दुःसहास्ते तपोग्नयः ।

यादोभिः सह पाथांसि तत्र सोढुमशक्नुवन् ॥ 21

कृतवानपराधं ते सहस्व मुनिसत्तम ।

प्रसीद तपसां श्रेष्ठ प्रसीद करुणानिधे ॥ 22

उपपराधं क्षमस्वार्य ब्रह्मर्षे यन्मया कृतम् ।

इत्येवं प्रार्थितः पत्या स्रोतसां स तपोधनः ॥ 23

लोकानामुपकुर्वाणो जगादेदं वचः शुभम् ।

यस्मात्त्वं शुद्धरत्नैश्च स्तोत्रेणापि सरित्पते ॥ 24

अजीजनो मत्प्रीतिं शुद्ध्युपायमतः शृणु ।

शुद्धरत्नेश्वरं नाम लिङ्गमाम्रवणे महत् ॥ 25

वर्तते सह्यजातीरे सिद्धगन्धर्वसेवितम् ।

यत्क्षेत्रं दक्षिणां काशीमाहुर्ब्रह्मविदो जनाः ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

तत्क्षेत्रं प्राप्य तल्लिंगं शुद्धरत्नैः समर्चय ।
ततस्त्वं तत्प्रसादेन शुद्धिमाप्स्यासि पर्वसु ॥ 27
न चान्यकाले ते शुद्धि र्भवेत्सेतु फला क्वचित् ।
सर्वरत्नाकरत्वं च तत्प्रसादात् भविष्यति ॥ 28
इति तद्वचसोदन्वान् शुद्धस्फटिक संन्निभः ।
प्राप्याम्रविपिनं पुण्यं पुण्यानोकह मंडितम् ॥ 29
नेत्रानंदकरं दिव्यं सर्वर्षिगण सेवितम् । तुर्ये
निमज्य सलिले स्वस्मिन् नियमेन समाहितः ॥ 30
शुद्धरत्नैः समभ्यर्च्य तं स्वैवत पुरांतकम् ।
तपसा तोषयामास चिरकालं ततः शिवम् ॥ 31
श्रीमानाम्रवणेशानो निजगाद सरित्पतिम् ।
तपसा ते प्रसन्नोस्मि शुद्धरत्नार्चनादपि ॥ 32
अप्पते यदवादित्वं मद्भक्त मुनिना पुरा ।
प्रसन्नेन तथैव त्वं भविष्यसि न संशयः ॥ 33
मद्भक्तैर्यत्प्रतिज्ञातं न च तद्वितथं भवेत् ।
अतस्त्वं पर्वकालेषु शुद्धिमाप्स्यसि नान्यथा ॥ 34
सूर्येन्द्वोरुपरागेषु तथान्येषु च पर्वसु ।
महोदयेपि च स्नात्वा तर्पयंति पितॄनपि ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

ते सर्व पातकै र्मुक्ताः पितृभिः सह शाश्वतम्।
मम लोकं समभ्येत्य पूज्यंते नात्र संशयः॥ 36
सर्व रत्नाकरत्वं च सर्वदा ते भविष्यति।
शुद्ध रत्नेश लिंगेति सर्व रत्नाकरेतिच। 37
मां त्वां च युगपत् स्मृत्वा ये स्नांति त्वयि वारिधौ॥ 37
सद्यः पातक कोटिभ्यो विमुच्यंते न संशयः।
इदमाख्यानमव्यग्रं यः शृणोति च नित्यशः॥ 38
स पुत्र पौत्रै र्दीर्घायु र्भूत्वाच धन वल्लभः।
भुक्त्वेह सकलान् भोगानंते मल्लोक मेष्यति॥ 39
एवं प्रसाद मुपलभ्य विशुद्ध रत्न
लिंगात्स मस्त सरितां पति राम्रवण्याम्।
मुक्ता प्रवाल मणि रत्न चयाकरत्वं
तस्मात्प्रभृत्यधिगतो न च पूर्वमेवम्॥ 40
द्रां भो राम्रवणेश्वरा जलनिधि र्वाल्मीक्यश्व शापात्कृतं
दौष्ट्यं तद्धि विसृज्य शुद्धिमगमत् सेतुं विना पार्वणीम्।
सेतोर्दर्शन मात्रत श्चिरमघं यद्ब्रह्म हत्यादिकं
सद्यो गच्छति पूत एव सततं श्रीरामसेतु र्महान्॥ 41
वाल्मीक्यश्वोपि शिव प्रसाद मचिरा ल्लब्ध्वा समस्तं जगत्

In Public domain. Digitization Muthulakshmi Research Academy

पश्यन् तन्मयमेव चेतसि सदा पर्णांबु वाताशनः।
पुण्यारण्य तटीमय न्मुनिवरः प्राप्याम्र पुण्यं वनं
तल्लिंगे विलयं लिलिंग विमले श्रीशुद्धरत्नाभिध्ये॥ ५८
औदन्वतं चरितमेत दतीव पुण्यं
यः श्रद्धया पठति पाठयते महादौ।
यद्वाङ्मनस्तनुज पापमनेन मुक्तः
सोय प्रसन्न हृदयो जयति प्रकृष्टम्॥ 43
इति स्कान्दे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये द्वाविंशो-
ध्यायः॥ ५९॥ ५९ ॥ ५९ ॥ ५९ ॥ ५९॥

In Public domain. Digitization Muthulakshmi Research Academy

ऋषयः॥ किमर्थं भगवान् शंभुरेण रूपमवाप्तवान्।
गौर्या सह तदाचक्ष्व भगवन् सूतनंदन ॥ 1

सूतः॥ कदाचिच्छबरः कश्चित्तस्मिन्नाश्रमवणे शुभे।
ग्रावैः सह चरत् द्वंद्वं विध्याध मृगयुः शरैः॥ 2

विद्धं तद्द्वंद्वमादाय आध्यःस्वनिलयं ययौ।
अथ ते पितृमातृभ्यां वियुक्ता मृगपोतकाः॥ 3

घूर्णमाना वने तस्मिन् शुष्ककंठोष्ठ तालवः।
अश्रुपूर्ण मुखास्तीव्रं खेद मापुर्निराश्रयाः॥ 4

आचचक्षु मृगं डोस्तच्छाता स्तन्मृग बाधनम्।
तदाकर्ण्य मुनिस्तत्र तताप भृश दुःखितः॥ 5

गौरी तत्र मृगीपोतान् मातृहीनान् सुदुःखितान्।
ज्ञात्वाब्रवीन्महेशानं दयमाना कृतांजलिः॥ 6

भगवन् करुणासिंधो मदाश्र विपिने शुभे।
मातृहीनान् मृगीपोतान् पश्येमान् भृशदुःखितान्॥ 7

एते संरक्षणीया हि भवता लोकरक्षिणा।
इति तद्वचनं श्रुत्वा गौरीमाह त्रिलोचनः॥ 8

शिवः॥ शृणु देवि प्रवक्ष्यामि विचित्रां कर्मणां गतिम्।
यथा धेनुर्विसहस्रेषु वत्सो विंदति मातरम्॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

तथा प्राणि सहस्रेषु कर्तारं कर्म विंदति।
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्॥ 10
मृगी पोता इमे देवि पूर्वजन्मनि भूतले।
जाता द्विजकुमाराहि ग्रामे कनकजांगले॥ 11
निहतं च मृगद्वंद्वं मे तेषां पितृमातरौ।
इमौ दुदुहतुर्धेनू रदत्वा पूर्णमर्जुनम्॥ 12
कुमारैः शान्ति तावत्सा ऊध्नः पाना त्तुरैर्वहि।
तत्कर्म परिपाकेन जाताः पितृसुता मृगाः॥ 13
हंतायं मृगयुर्व्याधो गोपोभूत्पूर्वजन्मनि।
नादत्तां वेतनं चास्मै तावेतौ द्विजजन्मनि॥ 14
स गोपो याजतां प्राप्य मृगभूतौच तौ वने।
हत्वा तद्देह मादाय वेतनार्थ मभक्षयत॥ 15
गवां संताडनात्पूर्वं गोपो व्याध्य मेयिवान्।
स च धेनुं प्रहर्तारो गाश्च पूर्वहनादपि॥ 16
विक्रुर्वते च पात्राणि शबरास्ते भवंति हि।
अत एते मृगीपोता धेनुवत्सा यथा पुरा॥ 17
अपीतदुग्धा - - - शुष्ककण्ठोच्छिता लवः॥
दुःखिताः संचरंति स्म तत्रैव विपिने भवम्॥ 18

In Public domain. Digitization Muthulakshmi Research Academy

मदाश्र विपिने पुण्ये मृतिं यातौहि तन्मृगौ।

प्राप्य पुण्यकृतां ल्लोकानंते कैलास मेध्यत ॥ 19

गौरी ॥ कथमस्मिन्वने जाता इमे दुष्कृत कारिणः

इदं तु विपिनं पुण्यं लभ्यं पुण्य कृतां चिरम् ॥ 20

भगवन् संशयं मेद्य छिंधि सर्वविदाँ वर ॥ 20

शिवः ॥ शृणु सुभ्रूः प्रवक्ष्येहं मेतषामिह संभवम् ॥ 21

धौरेयो मम भक्तानां कश्चिदासीद्द्विजोत्तमः ॥ 21

पूर्वमुग्रतपानाम वेदशास्त्र विचक्षणः।

जगाम काशीं विप्रोसौ प्राप्तः कनक जांगलम् ॥ 22

निदाघ किरणोस्रेण मध्याह्नेयं प्रताडितः।

स्नात्वा तत्र सरस्ताये मत्पूजां कर्तुमैहत।

चलितुं न शशाकाय मातपं वीक्ष्य दुःसहम् ॥ 23

मां समर्चयितुं पत्राण्याहर्तुं चकमे हृदि।

एतान् विहरतो दृष्ट्वा कुमारान् विप्र जन्मनः ॥ 24

प्राहेदं ब्राह्मणः शांतः पुष्पाण्याहर्तुमिच्छया।

भो कुमारा आरामः कुत्र ब्रूत ममाधुना ॥ 25

शिवार्चनं मे कर्तव्यमातपो मां प्रबाधते।

इति तद्वचसा शीघ्रं कुमाराः पुष्प वाटिकाम् ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

मृगंडुस्च विप्रेंद्रः शिष्यानाहूय सादरम् ।
किं कुर्वंतीति तान् स्तोकान् छात्राः पश्यत सत्वरम् ॥ 36
इत्यब्रवीत्तथा गत्वा ते पश्यंतः स्थले र्भकान् ।
अतीव हृष्टान् संपुष्टान्स्वं कु - ना चमूरुणा ॥ 37
यथावल्लालितान् दृष्ट्वा मुनिं प्रति तदब्रुवन् ।
यथावद्भगवन् स्तोकाः पितृभ्या मुपलालिताः ॥ 38
वर्तंते सुतरां पुष्टा स्तद्धेतुं न च विद्महे ।
इति तद्वचनं श्रुत्वा मृगंडु र्विस्मयान्वितः ॥ 39
स्वयमागत्य तान् दृष्ट्वा यथावन्मातृसंयुतान् ।
अति पुष्टान् विहरतो विपत्याप्लुत तच्छिशून् ॥ 40
किमेतदिति साश्चर्यं मपश्यत् ज्ञान चक्षुषा ।
कृष्णसारं मृगीं तांच लालयंतौ तदर्भकान् ॥ 41
गिरिशं गिरिजां ज्ञात्वा चंद्रमौल्यादि लक्ष्मणा ।
निपत्य दंडवद्भूमा वानंदाश्रुकणान्वितः ॥ 42
अभ्यष्टौत्परया प्रीत्या मृगंडु स्तापसोत्तमः ॥ 42
यत्पाद्योनिर्जिमंत्वने समभवज्ज्वालाहलारण्यं गरं
तत्क्षा जगतीं जुगोप सहसा सोयं पुरां मर्दनः ।
ऐणेयीं तनु मार्यया सह गतो रक्षन्मृगीशावकान्

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमाम्राम्रवणेश्वरो विजयते कारुण्य वारांनिधिः ॥ 43

जय जय सनकाद्यै र्योगिभि र्ध्येय मूर्ते ।
जय जय निटिलाक्ष ज्योतिषा लीढ काम ॥ 44

जय जय निगमांतै र्वेद्य भक्तार्ति हारिन् ।
जय जय शिव शंभो पाहि माम्र नाथ ॥ 45

जय जय करुणाब्धे चारु चंद्रार्ध मौले ।
जय जय नतबंधो धूर्जटे दिव्य मूर्ते ॥
जय जय विजि मुख्यै दैवतै र्वंदितांघ्रे ॥
जय जय शिव शंभो पाहि माम्र नाथ ॥ 46

जय जय गिरिकन्या श्लिष्ट वामांक शालिन् ।
जय जय फणि वर्यै र्भूषणै र्भूषितांग ॥
जय जय सुरसिंधु स्फीत चूडावभासिन् ।
जय जय विपिनेस्मिन् शुद्धरत्नेश लिंग ॥ 47

इति स्तुत्वा मुनींद्र स्तं प्रणिपत्य पुनः पुनः ।
विलोक्य विस्मयाविष्टः सांबं शबर विग्रहम् ॥ 48

प्राप पर्णकुटीरं स्वं ध्यायन्नाम्र वणेश्वरम् ।
तदाम्र विपिन क्षेत्रं ब्रह्मा तीर्थो पशोभितम् ॥ 49

मृग तीर्थ पुरं प्राहु स्तेनापि च हेतुना ॥

In Public domain. Digitization Muthulakshmi Research Academy

भगवानपि विश्वात्मा रक्षित्वा तन्मृगार्भकान्॥ 49
गाणापत्यं ददावंते तेषां कैलास भूभृति॥
गणा क्षानिति तान् प्राहु: शिवयो रति हार्ददान्॥ 50
शुभं मृगीपोत चरित्र मेतत्
श्रुत्वा पठित्वापि समस्त पापै:।
मुक्त स्तदाम्रेश दयैक पात्री
भूतो भवत्येव समर्थ्य वर्य:॥ 51
इति स्कांद पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये त्रयोविंशो ध्याय:॥

॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ चतुर्विंशोऽध्यायः ॥

ऋषय :- सर्वस्य यज्ञस्य सिद्ध्यर्थं .... ।

गायत्री सरितो ब्रूहि माहात्म्यं सूतनंदन ॥ 1

सूत :- शृण्वंतु मुनयः सर्वे गायत्री सरितः कथाः ।

याः श्रुत्वा सर्ववेदानां पारायण फलं विंदेत ॥ 2

तस्मिन् ब्राह्मवण क्षेत्रे कदाचित्पद्म संभवः ।

अश्वमेध महायज्ञमारेभे विबुधैः सह ॥ 3

तस्मिन्नवभृथे प्राप्ते स्नातुकामः स पद्मभूः ।

सस्मार देवीं गायत्रीं सापि सद्य उपस्थिता ॥ 4

तामाह भगवान् ब्रह्मा त्वं नदी रूपिणी द्रुतम् ।

लिंगस्य दक्षिणे पार्श्वे प्रवहस्वाम्र कानने ॥ 5

गत्वाच प्राङ्मुखी किंचित् संगच्छ स्वाद्य सह्यजाम् ।

त्वत्तीर्थे कुर्वतां स्नानं नुद त्वं पाप संचयम् ॥ 6

सदा त्वत्तीर संभूतान् सस्यादीन् संप्रवर्धय ।

इत्युक्ता साच गायत्री पश्चादाम्रवण स्थलात् ॥ 7

क्रोश मात्रे समुद्भूय सुराणां पश्यतां तदा ।

प्राङ्मुखी प्रवहंत्यूर्मि फेन बुद्बुद मंडिता ॥

प्रेम पुर्यंतिके गत्वा कावेरीं समगच्छत ॥

ततो ब्रह्मा महर्षिभिरन्यैश्च त्रिदशादिभिः ॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

तत्र स्नात्वा समाप्यान्ते वाजिमेधं यथाविधि।
प्रणम्याम्र वनेशानं प्रपेदे निजमालयम्॥ 10
तदा प्रभृति सा देवी गायत्री मुनिपुंगवाः।
प्रवहंती सदा भाति पुनंती स्नान कृन्नरान्॥ 11
गायत्री सरितस्तीरे कदाचित्समजायत।
किंचिदाश्चर्यमतुलं वच्मि श्रोतव्यमादरात्॥ 12
पुराहि सुव्रतो नाम ब्राह्मणो नियत व्रतः।
वसन् गुरुकुले नित्यं नियमाध्ययने रतः॥ 13
तस्य नित्यं गुरुकुले वसतो ब्रह्मचारिणः।
समाप्तिं नागमद्विद्या वयस्यैस्तु समापिता॥ 14
स निर्विण्णस्तदा विप्र आलुलोचे सुदुःखितः।
गायत्री वेदविद्याहि सैवेयं सरिदाकृतिः॥ 15
वर्तते ब्रह्मणा हूता वाजिमेध समृद्धये।
अत्र एनां नदीमेव मुनिमंडल भूषिताम्॥ 16
उपास्य विद्यां प्राप्स्यामि नान्या गतिरिहास्ति मे।
इति निश्चित्य मनसा गुरुमप्यनुमान्य च॥ 17
तदा ज्ञयौ ततो विप्रो गायत्री सरितस्तटम्॥
यदाम्रविपिनं पुण्यं ततः पश्चिम संभवम्॥ 18

In Public domain. Digitization Muthulakshmi Research Academy

कदंब विपिनात्सूर्ं प्राप्य तेपे महत्तप:।
गायत्रीमापगां देवीं सिद्ध गंधर्व सेविताम् ॥ 19
तपसा शमयामास नियमेन समाहित:।
चंपकाशोक पुंन्नाग करवीर मुखै: सुमै:॥ 20
अर्चयित्वा सरिच्छ्रेष्ठां धूप दीपैश्च भक्तित:।
निवेदनैश्च संतर्प्य कंदमूल फलादिभि:॥ 21
ता - - - - - - - - - स्तुत्वा सौ प्रणिपत्य च।
निर्वृत श्चिरकालेन तत्तीरेऽवसत् व्रती ॥ 22
तपसा तेन संतुष्टा गायत्री सा सरिद्वरा।
नाभिदघ्ने जले हस्त ॥ 23
सौवर्ण वलयान्यस्य ज्ञापनाय अचालयत्।
सौवर्ण वलयानां च श्रुत्वा शिंजित मुत्तमम्॥ 24
स आवर्त्य मुखं शीघ्रं सुव्रतों जलिम - - - ।
- - - - - - - - - - भूषितां शुभाम् ॥ 25
रत्नांगुलीयकं विद्धि करपल्लव शोभिताम्।
सुबाहुलतिकां श्रोणीं दृष्ट्वा विस्मित मानस:॥ 26
अवरुह्य जले शीघ्रं - - - - - - यदंजलिम्।
दिव्यमामलकं देवी जांबूनद समप्रभम् ॥ 27

In Public domain. Digitization Muthulakshmi Research Academy

तस्य हस्ते प्रदायाऽऽ प्रदर्श्याऽत्मानमद्भुतम्।
तटिद्वन्निमिषेणैव पुनरंतरधात्सले॥ 28
ततो स सुव्रतो विप्रः संप्रहृष्ट तनूरुहः।
तदादाय फलं दिव्यं करे प्राप्तां त्रयीमिव॥ 29
मन्वानः कूलमारुह्य जहर्ष मुनिभिः सह। 29
उशांगुरिति विख्यातो मुनिः परम धार्मिकः॥ 29
स वृद्धः सुव्रतं प्रेक्ष्य कंपमान जटाधरः। 30
इदं प्राह प्रहृष्टात्मा मुने सुव्रत सुव्रत॥ 31
कृतार्थस्त्वं महाभाग गायत्री लोकपावनी। 31
एव हंत्री सरिद्रूपं लोकरक्षण तत्परा॥ 32
सैवेयं ते प्रसन्नाभूत् तपोभिस्ते व्रतै रपि।
इमं देश मनुप्राप्तो जरा झर्झरितां तनुम्॥ 33
ति स्वाज यियुरत्रैव न च मे संप्रसीदति।
इदमामलकं दिव्यं प्राश्य त्वं शुचि व्रतः॥ 34
षडंग सहितान वेदान लब्ध्वा ज्ञानवतां वरः।
भविष्यसि न संदेहः पुनरन्यच्छृणुष्व ह॥ 35
उच्छेत्स्यंति त्रयो वेदा दुर्भिक्षे काल आगते।
तद्दशा देव मार्गेषु विभ्रष्टा क्षुत्पीडिताः॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

ततः सुभिक्षमभ्येत्य त्वामुपेष्यंति भूसुराः।
निरामयं त्वामत्रैव निष्ठितं वेदधारिणम्॥ 37
वेद भिक्षाटनं सर्वे करिष्यंति त्वयि द्विज।
इति तद्वच आकर्ण्य तं वृद्धं प्रणिपत्य च॥ 38
तत आमलकं दिव्यं भानरत्ना सबीजकम्।
तत्क्षणे प्रति भांति स्म सर्वे वेदाः षडंगिनः॥ 39
पूर्वं समापिताम्नाया स्तद्वयस्याश्च संगताः।
तुष्टुवुस्तं मुनिश्रेष्ठं गुरुणा सह संयुताः॥ 40
एवं --- वयं सर्वे सम्यगीष्म गुरो मुखात्।
संप्राप्ताः सकला वेदाः सांगोपागा स्त्वयाधुना॥ 41
कृतार्थोऽसि कृतार्थोऽसि त्वमेव सुकृती भुवि।
इति संश्लाघ्य ते सर्वे स्वं स्थानं प्रतिपेदिरे॥ 42
अत्र रैभ्य मुनेः कन्यामुद्वाह्य विजिवन्मुनिः।
सुशीलां चारु सर्वांगीं इष्ट्वा च सुबहून् क्रतून्॥ 43
गार्हस्थ्यं धर्म निरतो बभूव सततं मुनिः।
वेदानध्यापयामास बहूनामपि नित्यशः॥ 44
तदा प्रभृति तत्क्षेत्रं पुण्य भूरुह भूषितम्।
प्रादुर्वलय नाटीति देशा वलय नाटनात्॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

कदंब विपिन क्षेत्रे वेद भिक्षाटनात् पुरा।
भिक्षाटन मिति प्राहु रेतत्क्षेत्रस्य पश्चिमम्॥ 46
एवं स्वदार सहितः सुव्रतो नियमान्वितः।
उवास सहितः शिष्यैः क्षेत्रे वलय नर्तने॥ 47
इदं च चरितं दिव्यं गायत्सा शृणुयान्नरः।
स मुक्तः सर्व पापेभ्यः पुण्य लोके महीयते॥ 48
इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये चतुर्विंशो-
ध्यायः॥ ५.॥ ५॥ ५॥ ५॥ ५॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत :- अथ कालांतरे तत्र ग्रह योग विशेषतः।
पंच सप्त च वर्षाणि न ववर्ष शतक्रतुः॥ 1
तस्यां द्वादश वार्षिक्यामनावृष्ट्यां महीतले।
सर्वा ओषधयो नष्टा वीरुधश्च महीरुहाः॥ 2
स्वाहाकारो वषट्कारो स्वधाकारश्च नाभवन्।
प्राद्रवन् क्षुत्परीतांगा मुनयः सर्वतो दिशः॥ 3
तान् दृष्ट्वा प्रसृतान् विप्रान् सुव्रतो वेदपारगः।
गमनाय मनश्चक्रे यत्र देशो सुभिक्षता॥ 4
अथ तं प्राह गायत्री वसंत निज रोधसि।
तटिद्देह मुत्क्षिप्य तिरोधाय पुनर्जले॥ 5
अशरीरा जगादैवं संबोध्य द्विज सत्तमम्।
न गंतव्यमितः क्षेत्रात् सुव्रता तव भार्यया॥ 6
सुखमास्व सान्निध्यं त्वां पालयिष्यामि पुत्रक।
कूपं खन सविस्तारं अस्मिन्नेव तपोवने॥ 7
उत्स्यति जलं तूर्णं पर्वतेभ्य इवापगाः।
आवापयस्व श्यामाकान् कूपैस्तोयैर्विवर्ध्य॥ 8
न शोष्यति जलं किंच वर्धिष्यति पुनः पुनः।
न्यस्तमेवैष देवी पुत्रमिवौरसम्॥ 9
इत्युक्त्वा विररामैषा देवी पुत्रमिवौरसम्॥

In Public domain. Digitization Muthulakshmi Research Academy

अथायं तद्वचः श्रुत्वा संप्रहृष्ट तनूरुहः ।
तत्रैव न्यवसत्तत्र स्वजनैः सह हर्षितः ॥ 10
खात्वा कूपं वने तस्मिन् उत्पाद्यामाकमंडलम् ।
आहाव सलिलैर्नित्यं वर्धयित्वा सयत्नकम् ॥ 11
स मुनिस्तर्पयामास पितॄन्देवान् ऋषींस्तथा ।
अग्निहोत्रं यथाकालं जुहाव सुसमाहितः ॥ 12
अशनैः सादरं नित्यमतिथींश्चाप्यतर्पयत् ।
अथ तस्यामतीतायामनावृष्ट्यां महर्षयः ॥ 13
क्षुधा विस्मृत वेदाश्च स्वं स्वं स्थानं प्रपेदिरे ।
अन्योन्यं परिपप्रच्छुः पुनः स्वाध्याय कारणम् ॥ 14
वेदो न प्रतिभाति स्म मध्ये तेषां तु कस्यचित् ।
कदंब विपिने पुण्ये मार्कंडेय महामुनिम् ॥ 15
तपस्यंतं समभ्येत्य वेदभिक्षामयाचिषुः ।
भगवन् तपतां श्रेष्ठ दुर्भिक्ष भय पीडिताः ॥ 16
गतवंतो वयं सर्वे नाना देशान् यथा तथा ।
बुभुक्षितानामस्माकं वेदा ह्यपरिशीलनात् ॥ 17
विनष्टा न प्रकाशंते भवान्नः परमा गतिः ।
अस्मान् व्यापय स्नेह कृपया परया मुने ॥ 18

In Public domain. Digitization Muthulakshmi Research Academy

अथ तानब्रवीद्विप्रान् मार्कंडेयो महामुनिः।
बालोहं स्थविरा भूय मतीवाद्य महीसुराः॥ 19
अतो नार्हामि भवतां छंदोध्यापन कर्मणि।
योह्यधर्मेण गृह्णीयात्प्रब्रूयाद्वा श्रुतिं नरः॥ 20
उभौ नारकिणौ स्यातामिति वेदानुशासनम्।
अतस्त्वां वच्मि यो ब्रूयाद्वाम्नायं भवतामिह॥ 21
गभूतौ वर्तते ह्यस्माद्विपिना त्पूर्व भागतः।
गायत्री सरितस्तीरे क्षेत्रं वलय नर्तनम्॥ 22
यत्रास्ते सुव्रतो नाम मुनिः परम धार्मिकः।
स गायत्र्याः प्रसादेन षडंग सहिताः श्रुतीः॥ 23
अधिपेदे स तत्रैव वर्तते न चचाल च।
नित्यं स्वाध्याय शीलश्च पितॄन् देवांश्च तर्पयन्॥ 24
तमेन मुपयातान्व स वेदं स्थापयिष्यति।
इति तद्वचनात्सर्वे समाजग्मुश्च सुव्रतम्॥ 25
तदनुग्रहतः सर्वे यथावद्वेद पारगाः।
भूत्वा सशिष्याः सत्कर्म निष्ठा भूसुर सत्तमाः॥ 26
गायत्र्याः सरितस्तीर वासिनो ध्युत कल्मषाः।
अनुभूय चिरं सौख्य मंते मुक्तिं च संगताः॥ 27

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं मृगंडुसुतमेत्य च वेदभिक्षां
यताभ्य याचिषत ते धरणीसुरेंद्राः।
पश्चात् स्थितं वलयनृत्त पुरात् स्थलं तत्
भिक्षाटनाख्य पुरमद्य वदंति विप्राः॥ 28

इदं च सुव्रताख्यानं यः शृणोति सकृन्नरः।
स मूढोपि भवेद्वाग्मी वेद वेदांग तत्ववित्॥ 29

इति स्कांदे पुराणे अगस्त्य संहितायां
क्षेत्र खंडे आम्रवण माहात्म्ये पंचविंशो-
ध्यायः॥ ५॥ ५॥ ५॥ ५॥ ५॥ ५॥ ५॥ ५॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ षाड्विंशोऽध्यायः ॥

ऋषयः॥ भगवन् सूत सर्वज्ञ पुराकातरुमूलतः।
आविर्भूतस्य लिंगस्य को धन्यो निर्ममे भुवि॥ 1
आलयं सविमानं च सप्राकारं सगोपुरम्।
तत्समाचक्ष्व विस्तार्य शुश्रूषा महती हि नः॥ 2
इत्येतद्वचनं श्रुत्वा सूतः प्राह पुराणवित्।
सूतः॥ शृण्वन्तु ऋषयः सर्वे सावधानेन चेतसा॥ 3
निर्मातुरालयस्यास्य धन्यस्य चरित्रं महत्।
पुरा कश्चिद्भून्नाम्ना श्वेतकेतुर्महीपतिः॥ 4
वैजयंताख्य नगरे शिवभक्त धुरंधरः।
चोलदेशस्थ सकल प्राणिहृत्पद्म भास्करः॥ 5
महाबुद्धिर्महाधीरो महादाता महागुणः।
स राजा मंत्रिभिर्युक्तः सेनया चतुरंगया॥ 6
प्रजा धर्मेण संरक्षन् रराज दिवि शक्रवत्।
तस्यैवं वर्तमानस्य नासीद्वंशकरः सुतः॥ 7
रराजे बहुभिर्यज्ञैः पुत्रकामेष्टिपूर्वकैः।
ब्राह्मणेभ्यो ददौ गाश्च सवत्साः कांस्यदोहनाः॥ 8
उर्वराश्च ददौ भूमीर्द्विजन्मभ्यो महायशाः।
न च वंशकरं पुत्रमाससाद स भूपतिः॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

ततः स भार्या सहितो निर्वेदमगमद्भृशम्।
अपुत्रस्य च राज्येन किं धनैर्वा प्रयोजनम्॥ 10
नाप्रजस्य भवेत्कीर्ति र्नाप्रजस्य त्रिविष्टपम्।
सोऽहं तपश्चरिष्यामि पत्न्या साकं महावने॥ 11
इति निश्चित्य मनसा चोलसिंहासनाधिपः।
आहूय मंत्रिणः सर्वान् स्वमनः क्लेशमब्रवीत्॥ 12
मम पुत्र विहीनस्य यजतोऽपि महाक्रतून्।
अभीभिः संपदां जालै र्गजैरपि च वाजिभिः॥ 13
रथैः पदातिभिश्चान्यै वस्तुभिर्वा प्रयोजनम्।
भवत्स्वाधाय मे राज्यं सवाजिरथकुंजरम्॥ 14
पुत्र संपत्तये शीघ्रं तपोवनमुपाश्रये॥
इत्युक्तवति भूपाले श्वेतकेतौ सभांतरे॥ 15
प्रति वक्तुं न शक्तोऽभूत कश्चिदप्यत्र मंत्रिषु॥
श्वः प्रभाते गमिष्यामि तपसे काननं महत्॥ 16
इत्युदीर्य सभास्तारान् राजांतः पुरमाविशत्॥
अथ तस्मिन् दिने रात्रौ भुक्त्वासौ सह भार्यया॥ 17
चिंताक्रांतः शिवं भक्त्या स्मरन्निद्रामुपेयिवान्॥
अथ भक्त पराधीनः शशिखंड शिखामणिः॥ 18

In Public domain. Digitization Muthulakshmi Research Academy

द्विज रूपं समास्थाय भूति रुद्राक्ष भूषितः।
उपागम्यांतिकं राज्ञस्तं संबोध्य समब्रवीत ॥ 19
राजन् यद्यस्ति पुत्रेच्छा तव वाचं शृणुष्व मे।
अस्ति जंबूपति क्षेत्रात् पूर्वस्यां दिशि भूपते॥ 20
किंचिदीशान दिग्भागे गायत्री सरितस्तटे।
क्षेत्र माम्रवणं नाम मुनिवर्य निषेवितम् ॥ 21
तस्मिन्नाम्र तरोर्मूला दाविर्भूय स्वयं शिवः॥
चकास्ति लिंग रूपेण तत्र गत्वा त्वमादरात् ॥ 22
सभोमयामं लिंगस्य कारयस्वालयं शुभम् ॥
अथ देव्याश्च निलयं लिंगस्येशान भागतः॥ 23
कारयित्वाथ तत्र त्वं देवीं स्थापय शास्त्रतः॥
अथात्र परिवाराणां देवतानां यथाक्रमम् ॥ 24
प्रतिष्ठां कुरु भो राजन् आगमोक्त विधानतः॥
प्राकारादीनि निर्माय यथाशक्ति महीपते ॥ 25
तत्रत्य ब्रह्म तीर्थे त्वं संस्नाय नियमान्वितः॥
अभिषेकार्चना दिव्य धूप दीप निवेदनैः॥ 26
प्रदक्षिण नमस्कार स्तोत्रैर्नाना विधैरपि॥
संबोध्य जगदीशं तं सांब माम्रवणेश्वरम् ॥ 27

In Public domain. Digitization Muthulakshmi Research Academy

तत्क्षेत्र वासिनो विप्रान् संपूज्येष्ट समर्पणै:।
मासमेकं मुनिश्रेष्ठा भुंक्ष्व भार्यया सह ॥ 28
पश्चात्स्वपुरं प्राप्य प्रजा धर्मेण पालय ॥
अत्रागमनमात्रस्य कृपया ते भविष्यति ॥ 29
सत्पुत्रश्चिरजीवी च मातापुत्र हिते रत:॥
इत्युक्त्वांतर्दधे भूपं द्विजवेषधर: शिव:॥ 30
अथ काल्ये समुत्थाय राजा विस्मित मानस:॥
आहूय मंत्रिण: सर्वान् स्वप्न वृत्तांतमब्रवीत् ॥ 31
मंत्रिणस्त्वब्रुवन् सर्वे श्वेतकेतुं प्रहर्षिता:॥
ब्राह्मणोक्तं हि यद्वाक्यं तत्तथैव भविष्यति ॥ 32
अतस्त्वं शरणं याहि राजन्नाम्रवणेश्वरम्।
अवश्यं लप्स्यसे संतं पुत्रं वंशविवर्धनम् ॥ 33
इति तैरेवमुक्तोथ राजा परपुरंजय:।
कार्तिके बहुमतै र्निश्चिते शुभ लग्नके ॥ 34
प्रस्थातु काम श्चोलेंद्रो निजपत्न्या सहानघ:।
तोषयामास विप्रेंद्रान् भूषणांबर गोधनै:॥ 35
तत: पर्जन्य घोषेण रथेनानिल रंहसा।
प्रतस्थे पश्चिमामाशां सूत मागध संस्तुत:॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

गजाश्वरथपत्तीनां सहस्राणि बहूनि च।
अन्ययुश्चोलवसुधा नाल्पं गच्छंतमध्वनि॥ 37
तत श्चोलमहेंद्रोयं रवेनादिस वर्चसा।
40 A स्वराष्ट्रं मुदितं स्फीतं पनसाम्रवणोज्वलम्॥ 38
तुष्ट पुष्ट जनाकीर्णं ब्रह्म घोष विनादितम्।
अकुतश्चिद्भयं रम्यं प्रसन्न सलिलाशयम्॥ 39
दान शील जनोपेतं क्षेत्र प्रवर मंडितम्।
ब्राह्मणावसथैः पूर्णं पश्यन् प्रसरद्दिशां ययौ॥ 40
कावेरीं दृष्टवान् तत्र प्रवहंतीं च दक्षिणे।
वैजयंत पुरात् स्वस्मात् योजनांते शुभोदकाम्॥ 41
यया शातमुखी भूत्वा पाल्यते चोल काश्यपी।
समुद्रराजमहिषीं सर्व कल्मष नाशिनीम्॥ 42
दृष्ट्वा तां दक्षिणां गंगां कुंभघोण स्थलं गताम्॥
श्वेतकेतु महाराजः परं हर्षमवाप्तवान्॥ 43
प्रत्युद्गतश्च तत्रत्यै ब्राह्मणैर्वेदपारगैः।
मंगलोपायनोपेतैः कृताशीः कृत मंगलः॥ 44
निवेश्य ध्वजिनीं तत्र ब्राह्मणावसथाद्बहिः।
आप्लुत्य सह्यजातोयैर्नियमेन समाहितः॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

देवान् पितृंश्च संतर्प्य धनैश्च ब्राह्मणानपि।
उषित्वा नवहस्तत्र ततः प्रातः कृताह्निकः॥ 46
प्रतस्थे पश्चिमामाशां पृतनाभिः समन्वितः।
जप्येशक्षेत्रमासाद्य ततः प्रेमपुरीं गतः॥ 47
प्रेमपुष्करिणी यत्र राजते वटकानने।
49 तिस्रो रात्रीरुषित्वा(सं) पत्नि क्ष्मापति शेखरः॥ 48
तत्र आम्रवणं नाम सुरभीकृत दिङ्मुखम्।
यत्रोच्चरंति कल्याणीः शुकाश्च मधुरा गिरः॥ 49
शिव शंभो महादेव पाहि नस्तावकानिति।
तद्ददर्श महीपालो विस्मयाविष्ट मानसः॥ 50
50 B पुनरन्यांश्च तत्रत्यान् भस्मोद्धूलित विग्रहान्।
गृणतः शिवनामानि रुद्राक्षैः समलंकृतान्॥ 51
क्रमतः शिवपूजां च बाण स्फटिकमूर्तिषु।
पार्थिवेषु च लिंगेषु रस रूप्य कृतेषु च॥ 52
राशीकृत्वा सुपुष्पाणि तत्र तत्र च संघशः।
स्थित्वा सुरम्ये गायत्र्याः सरितः शोभने तटे॥
सर्वं शिवमयं राजा अलोकयत भक्तितः॥ 53

(इति स्कांदे पुराणे अगस्त्य संहितायां)

In Public domain. Digitization Muthulakshmi Research Academy

क्षेत्र खंडे आम्रवणमाहात्म्ये षड्विंशो ध्यायः॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ सप्तविंशोऽध्यायः ॥

अथ चोलपतिः सेनां स्थापयित्वा सुदूरतः।
गायत्री सरिति स्नात्वा समाहितमनाः शुचिः॥ 1
भूति भूषित सर्वांगः सरुद्राक्ष शिरोधरः।
आम्र काननमभ्येत्य तन्मध्ये कस्यचित्तरोः॥ 2
मूलदेशे विराजंतं लिंगरूपिणमद्भुतम्।
शुद्ध रत्नाकृतिं शंभुं संवीक्ष्य मुमुदे तराम्॥ 3
पुलकांकित सर्वांगः आनंदाश्रुपरिप्लुतः।
कृत्वा प्रदक्षिणं भक्त्या साष्टांगं प्रणनाम सः॥ 4
तन्महालिंगमालोक्य न तृप्तिमगमन्नृपः।
अथालयस्य निर्माणे शिल्पिनः समचोदयत्॥ 5
ते शिल्पिवर्याः सर्वेपि निश्वासाद्द्राज्ञि शंकरे।
भक्त्या निर्ममिरे शिल्प शास्त्रोक्तेनाथवालयम्॥ 6

In Public domain. Digitization Muthulakshmi Research Academy

कोटि सूर्य प्रतीकाशं विमानं चाति सुन्दरम् ।
तथा देव्यालये चापि विमान वर मंडितम् ॥ 7
यथा स्थानं गणेशादि परिवार सुरालयम् ।
निर्माय परितः सालं दृढं भृश समुन्नतम् ॥ 8
४१ अग्रभागे गोपुरंच्च प्रतिमाभि रलंकृतम् ।
A
(विचित्राभि रनेकाभि रव भूपाज्ञया प्रभोः ॥ 9
एवं सर्वं विनिर्माय ते भूपाय मजिज्ञपन् ।
राजा तत्सर्वमालोक्य संहृष्टे नांतरात्मना ॥ 10
शिल्पिन स्तोषयामास धन वस्त्र विभूषणैः ।
शुभर्क्षे शुभलग्नेथ ब्राह्मणै र्वेदपारगैः ॥ 11
आगमोक्त विज्ञानज्ञै रनेकैः सह भूपतिः ।
शास्त्रोक्त लक्षणज्ञेन शिल्पिवर्येण निर्मिताम् ॥ 12
य देवीं सुलक्षणां तत्तदंग विन्यासिनै र्भृशम् ।
सुन्दराकृति मत्यंतं प्रतिष्ठाप्य विधानतः ॥ 13
बालां त्रिकेति देव्याश्च नाम चक्रे स्वयं तदा ।
तदन्नीमेव विघ्नेश प्रमुखान् देवतागणान् ॥ 14
स्थापयामास पृथ्वीन्द्रो यथास्थानं यथाक्रमम् ।
८ कारयित्वाथ रुद्रादिं महामंत्र जपं द्विजैः ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

महाभिषेकं देवस्य देव्याश्च सलिलैः शुभैः।
out see S.B.
आगच्छन्नमराः सर्वे विरिंचेन्द्र पुरस्सराः॥ 17
तदानीं मुदिताः सर्वे ववर्षुः पुष्प संचयान्।
ननृतुश्चाप्सरो मुख्या रंभा प्रभृतयो खिलाः॥ 18
जगुस्तुंबुरु मुख्याश्च गंधर्वा जात कौतुकाः।
वाद्य घोषो महानासीद्दिशो दश विनोदयन्॥ 19
भूसुरेंद्र मुखोद्भूता वेदघोषा जजृंभिरे।
एवं कोलाहले जाते तदा तस्मिन् महोत्सवे॥ 20
42 B षोडशैरुपचारैश्च पूजां परिसमाप्य च।
जात हर्षो धराधीशः संस्तुतः सकलै जनैः॥ 21
प्रदक्षिणान्यनेकानि कृत्वा नत्वा पुनः पुनः।
बालांबिका समेतं तं स्तुत्वा चाम्रवणेश्वरम्॥ 22
गोभूसुवर्ण दानानि ब्राह्मणेभ्यो ददौ नृपः।
ब्राह्मणान् बहु साहस्रान् भोजयामास भक्तितः॥ 23
विशालां कलयामास तदानीं पुष्पवाटिकाम्।
अथाम्रवण नाथस्य नित्य पूजार्थमादरात्॥ 24
नदीयानि बहुक्षेत्राण्यति श्लाघ्यानि भूपतिः।
परिकल्प्यार्चकांश्चापि वृत्तिपूर्वमकल्पयत्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

अथ राजा सपत्नीको ब्रह्मतीर्थेनुवासरम् ।
स्नात्वा देवं देवीं च संप्रणम्य पुनः पुनः ॥ 25
नित्यं सहस्रं विप्रेंद्रान् शिव भक्तान भोजयेत् ।
ततो षित्वा मासमेकं ध्यायन्नाम्रवणेश्वरम् ॥ 26
see प्रत्यय :- Page 158
यथाव त्स्वपुरं प्राप्य पत्न्यासाकं प्रहृष्टधीः ।
अथाम्रवण नाथस्य कृपया गुण शालिनम् ॥ 29
बुद्धिमंतं सुरूपाढ्यं पुत्रं प्राप्य सुधार्मिकम् ।
तेन साकं चिरं काल मनुभूय सुखानि च ॥ 30
अथांत काले संप्राप्ते श्वेतकेतु रसौ नृपः ।
पुत्रे राज्यं विनिक्षिप्य शिव सायुज्यमाप्तवान् ॥ 31
सूतः ॥ एवमाम्रवण क्षेत्र माहात्म्यं कथितं मया ।
य इदं शृणुयाद्भक्त्या पठेद्वा स विकल्मषः ॥ 32
पुत्र पौत्रैः परिवृतो भवेत्सर्व समृद्धिमान् ।
यानारी ब्रह्मतीर्थेत्र स्नात्वा भक्त्याम्र कानने ॥ 33
बालांबिकां पराशक्तिं सर्वाभीष्ट प्रदायिनीम् ।
एकादशेश लिंगं चाप्यभिषिच्य समाहिता ॥ 34
संपूज्य धूप दीपाद्यै रुपचारैश्च सादरम् ।
प्रणामं कुरुते भक्त्या सा ध्रुवं पुत्रिणी भवेत् ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

कर्तापि ब्रह्महत्यादि पापानां यो नरो द्विजाः।
संप्राप्य क्षेत्रमेतत्तु संस्नाय ब्रह्म तीर्थके॥ 36
संपूजयन् महालिंगं वृद्ध खेश नामकम्।
बालांबिकां च तां देवीं प्रणमन् भक्ति संयुतः॥ 37
मासमेकं संवसति स भूत्वा मुक्त किल्बिषः।
अनुभूय चिरं सौख्य मंते मुक्तिं गमिष्यति॥ 38
नचात्र संशयः कार्यो मरुतांतो निदर्शनम्।
गायत्री सरिति स्नानं वृद्ध खेश दर्शनम्॥ 39
आयुरारोग्य सत्कीर्ति संपदां मूल कारणम्।
बहु पुण्य समायोगा न्नृणां संभवति ध्रुवम्॥ 40
इत्येवं वादिनं सूतं शौनकादि मुनीश्वराः।
प्रणम्य संस्तुवंतश्च बभूवुर्हृष्ट मानसाः॥ 41
इति स्कांद पुराणे अगस्त्य संहितायां क्षेत्र-
खंडे आम्रवण माहात्म्ये सप्त विंशो ध्यायः॥ //

॥ आम्रवण माहात्म्यं समाप्तम् ॥

बालांबिका समेत आम्रवणेश्वर स्वामी
सहायः॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५॥

In Public domain. Digitization Muthulakshmi Research Academy

41-B இவையல் அடியவர்கள் ஒரு வரியைச் சேர்த்துக் கொள்ள வேறெங்கும் குறிப்பு காணப்படாததால் தனியாக எழுதப்பட்டிருக்கிறது. ஐந்தாவது வரி என்று எழுதப்பட்டிருக்கிறது. ஆதில் அங்கு யாதொரு அடையாளமுமில்லாததால் ஒன்றில் பார்க்கப்படவில்லை.

अथ प्रस्थाय भूपालस्तत्क्षेत्रेशान मागतः।
श्रीमंगलपुरे सामवेदनाथं प्रणम्य च॥ 27
श्रीतपस्तीर्थनगरं संप्राप्य परया मुदा।
सप्तर्षीश्वरमानम्य प्रदक्षिण पुरस्सरम्॥ 28
तत आदिपुरेशानं नमस्कृत्य स भूमिपः।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain: Digitization Muthulakshmi Research Academy